तत्त्वचिन्तामणौ

अनुमानखण्डः

श्रीमद्गङ्गेशोपाध्यायविरचितः

गवर्णमेण्टसंस्थापितसंस्कृतपाठशालाध्यक्ष श्रीयुत बाबु रसमय दत्त
महोदयानामनुज्ञया

श्रीमदनमोहनतर्कालङ्कारेः संस्कृतः

संस्कृतयन्त्रे मुद्रितः

कलिकाता

संवत् १९०५ ।

अनुमानखण्डः

प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते।

तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते।

अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति न अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात् तयोश्च परकीययोरप्रत्यक्षत्वात् अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातश्च। अपि चानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तिः प्रामाण्यस्यानुमेयत्वात् स्वतः प्रामाण्यपक्षे तत्संशयानुपपत्तेः। व्यभिचारशङ्कापायश्च वक्ष्यते।

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वम् साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्य

भावात् । नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधि-
करण्यानधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत्वं
तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चासिद्धम् ।

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घटत्वे
प्रसिद्धः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयि-
त्वात् । न चैवं घटत्वे व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगि-
ताकाभाववद्वृत्तित्वं हि व्यभिचारः न च वाच्यत्वाभाववत्तादृशो घट इति
येनरूपेण तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः । तथाप्य-
प्रसिद्धिः प्रतियोग्यवृत्तेश्च धर्म्मस्य प्रतियोगितावच्छेदकः तद्विशिष्ट-
ज्ञानस्याभावधीहेतुत्वात् अन्यथा निर्विकल्पकादपि घटो नास्तीति
प्रतीत्यापत्तेः न च शशशृङ्गं नास्तीतिप्रतीतेरप्रसिद्धेः शशशृङ्गं ना-
स्तीति च शशे शृङ्गाभावस्यार्थः । अथ साध्यासामानाधिकरण्यानधि-
करणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामा-
नाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेन्न साध्या-
सामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधि-
करणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणानधि-
करणे धूमे चाव्याप्तेः । नापि स्वसमानाधिकरणात्यन्ताभावाप्रति-
योगिसाध्यसामानाधिकरण्यं पर्व्वतीयवह्नेर्म्महानसीयधूमसमानाधि-
करणात्यन्ताभावप्रतियोगित्वात् द्रव्यत्वादेरव्याप्यवृत्त्यव्याप्यतापत्तेश्च ।
न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं देयं
संयोगादौ साध्ये द्रव्यत्वादेरैकान्तिकत्वाभावप्रसङ्गात् । नहि प्रति-
योगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति अधिकरणभेदेना-
भावभेदाभावात् । नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्य-
वत्त्वं व्याप्तिः मूले वृक्षः कपिसंयोगवानित्यबाधितप्रतीतेः तदन्यो-
न्याभावस्यापि तत्र सत्त्वात् । न चैवं भेदाभेदः अवच्छेदकभेदेन तत्-
सत्त्वाभ्युपगमात् साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्वमिति

सत्यर्थे व्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्भिन्नाधिकरण-
त्वात् वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च
विशेषाभावकूटादेवाभाववत्त्वोपपत्तौ सामान्याभावे मानाभा-
वात्। नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्या-
नधिकरणसाध्यसामानाधिकरण्यं साधनसमानाधिकरणस्य प्रमेय-
त्वादेर्वैयधिकरण्याप्रसिद्धेः महानसादौ समवायितया वह्निवह्निमतो-
रत्यन्तान्योन्याभावयोः सत्त्वात् धूमादावव्याप्यत्वापत्तेश्च। अथा-
नौपाधिकः सम्बन्धो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे सति साधना-
व्यापकः व्यापकत्वञ्च तन्निष्ठात्यन्ताभावाप्रतियोगित्वं व्यभिचारि च-
वत्त्वमुपाधेः प्रतियोगित्वं न विरोधित्वं महानसवह्निनियतसंयोग-
गोत्वाश्वत्वयोरतथात्वात् अन्योन्याभावप्रतियोगित्वस्य चाभावाच्च किन्तु
तथाधिकरणाभावयोः स्वरूपविशेषः सम्बन्धः तथा प्रतियोगित्वमनु-
योगित्वमपि अभावविरहात्मत्वं वेति चेत् अनिश्चितसाध्यव्यापकसा-
धनाव्यापकधर्मानिवेशो न धूमादौ अप्रकृतसाध्यव्यापकसाधनाव्यापक-
धर्मस्य सिद्ध्यसिद्धिभ्यां न निवेशः शक्यः यावत्साध्यव्यापके प्रमेय-
त्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्याप-
कत्वं निषिध्यत इति चेन्न अधिकरणत्वात् यावत्साधनाव्यापकव्यापकं
यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न सो-
पाधेरपि तथात्वात् तथा हि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनमत्
प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं
तद्व्यापकं महानसीयवह्निः। नापि साध्यं यावद्व्यभिचारि तदव्यभि-
चारित्वमनौपाधिकत्वं साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात् तच्च
दूषितम्। नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः एकव्यक्तिके तदभावात्
नानाव्यक्तिकेऽपि कार्त्स्न्येन सम्बन्धस्य प्रत्येकज्ञानाभावात् अतएव न
कार्त्स्न्येन साध्येन सम्बन्धो व्याप्तिः नियमशब्दार्थे तदभावाच्च। तच्च यावत्स-
साधनाश्रयाश्रितसाध्यसम्बन्धः साधनाश्रये महानसादौ सकले प्रत्येकं

वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्म्मसमा-
नाधिकरणसाध्यसामानाधिकरण्यं यावद्धर्म्मसामानाधिकरण्यं हि
यावत्तद्धर्म्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधनसमानाधिकरण-
सकलधर्म्मज्ञानसत्त्वाद्यधिकरणाप्रतीतेः। नापि स्वाभाविकः सम्बन्धो-
व्याप्तिः स्वभावजन्यत्वे तदाश्रितत्वादौ वा व्याप्यतिव्याप्तेः। नाप्य-
विनाभावः केवलान्वयिन्यभावात्। अथ सम्बन्धमात्रं व्याप्तिः व्यभि-
चारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशि-
ष्टैव निर्वक्तव्येति तत्र विरूपदानस्य विषयव्याप्तिस्वरूपनिरूपणप्र-
स्तावे सम्बन्धाभिधानस्यार्थान्तरत्वात्। न च सम्बन्धमात्रं तथा तद्बोधा-
दनुमित्युत्पत्तेः। नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं सम्बन्धज्ञाने-
ऽपि व्याप्तिपदाप्रयोगात्। केवलान्वयिनि केवलान्वयिधर्म्मसम्बन्धो
व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वं
अनुमितिमात्रे पक्षधर्म्मतैव प्रयोजिका। यथालोकचक्षुः विशेष
सामग्रीसहितायाः एव सामान्यसामग्र्याः कार्य्यजनकत्वनियमादिति
केचित् तदपि न साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्व्व-
तान्यस्मिन् धूमसत्त्वात्। न च सकलसाध्यवदन्यावृत्तित्वं वह्निमतां
प्रत्येकं तथात्वात् सर्व्वस्य च साध्यत्वसाधनत्वतदभिमतत्वानां
व्याप्तिनिरूपणे नात्माश्रयः साध्यत्वं हि न सिद्धिकर्म्मत्वं सिषाधयिषा-
विषयत्वं वा महानसीयवह्नौ तदभावात्। किञ्च सामान्यतो व्याप्त्यव-
गमेऽप्येवं परस्य कथमन्यथा दूषणे नासाधकतां साधयेदिति वाच्यं
स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति।

अत्रोच्यते। प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ता-
भावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामा-
नाधिकरण्यं व्याप्तिः अन्यभिन्नकेऽधूमवति पर्व्वतत्वत्यन्ताभावप्रति-
योगित्वेऽपि तत्प्रतियोगिता न वह्नित्वेनावच्छिन्नेति धूमवति वह्निर्नास्तीति
प्रतीतेः सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव अन्यथा सकल

प्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चाकाशे वायौ रूपं न वा वायू रूपवान्नवेति संशयो न स्यात् विशेषाभावकूटस्य निश्चितत्वात् ।

यद्वा प्रतियोग्यधिकरणासमानाधिकरणात्यन्ताभावप्रतियोगिना सामानाधिकरण्यं यदसमानाधिकरणान्योन्याभावप्रतियोगि यद्वत् भवति तेन समं तस्य सामानाधिकरण्यं वा स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्त्वं वा । अन्यद्बहिर्वह्निमतोऽन्यत्वेऽपि धूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वाद्व्यधिकरणत्वाद्वह्नि-धूमयोर्व्याप्तिः किन्तु तत्तद्धूमस्य समानाधिकरणतद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यं सर्वधूमस्य लक्षणत्वेन धूममात्रस्य व्याप्यत्वात् धूमसम्बन्धिवह्निसामान्यस्य युगपदुपलब्धिविषयत्वस्य व्याप्तित्वेन कर्म्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः । यद्वा प्रति-
२ योगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणं कर्म्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव । तथान्योन्याभावस्याव्याप्यवृत्तित्वम् अभेदस्यानाश्रितप्रत्यभिज्ञानात् । व्याप्यव्यापकभावाज्ञानेऽपि वस्तुतस्तथात्वेनाज्ञायमानस्य सम्बन्धस्यैव भानस्य फलत्वं न चैवमननुगमो दोषाय कस्य वा व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात् । अथ धूमवति वह्निह्रदो न कः धूमवान् वह्निह्रदो न भवतीति प्रतीतेर्व्यधिकरणधर्मावच्छिन्नप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेतल्लक्षणम् इति चेन्न तादृशाभावानभ्युपगमात् अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्निवह्निमन्तौ । अथवानौपाधिकत्वं व्याप्तिः तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम् । न चोक्तं सोपाधि-तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगिनि आर्द्रेन्धनवत्त्वादिसोपाधौ ऽत्यन्ताभावत्वेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपाधेः साध्यव्यापकत्वात् यतश्च यावत्स्वव्यभिचारिव्यभि-

धारि साध्यसामानाधिकरण्यमनौपाधिकत्वं गीयते । यद्वा यावत्स्वसमा-
नाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधि-
करण्यं यस्य तस्य तदेवानौपाधिकत्वं सोपाधौ तु साध्यवन्निष्ठात्यन्ता-
भावप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन समं हेतोः सामानाधि-
करण्यम् उपाधेः साधनाव्यापकत्वात् । यद्वा यत्सम्बन्धितावच्छेदकरूप-
वत्त्वं यस्य तस्य सा व्याप्तिः । तथाहि धूमस्य वह्निसम्बन्धित्वे धूमत्व-
मवच्छेदकं धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धे न वह्नित्व-
मवच्छेदकं धूमासम्बन्धिन्यपि गतत्वात् नत्वतिप्रसक्तमवच्छेदकं संयोगादेः
तथात्वादर्शनात् किन्तु वह्न्यार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धिताव-
च्छेदकं तद्रूपस्य व्याप्यमेव । अथवा यत्सामानाधिकरण्यावच्छेदकाव-
च्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यं वह्निसामानाधिकरण्यं हि धूमे
धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना । अतएव साधनतावच्छेदक-
भिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने
विशेषणमुपाधिरिति वदन्ति । अतएव च साधनाव्यापकत्वे सति
साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवं व्यभिचारिणि साधने एतच्च
साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं
साध्यसम्बन्धितावच्छेदकमस्ति तदेव च साधनावच्छिन्नसाध्यव्यापकं
साधनाव्यापकं तत्रोपाधिः अतएव व्यभिचारे चावश्यमुपाधिरिति
सङ्गच्छते अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारित्वेन न
तदनुमानमप्रयोजकत्वात् अतएव च तस्य साध्यसम्बन्धितावच्छेदकरूप
तया यत्र साधनताभिमते च वर्त्तते इति स्फटिके जवाकुसुम-
वदुपाधिरव्याप्यवृत्ते लक्षणन्तु साध्यसाधनसम्बन्धव्यापकत्वे सति साधना
व्यापकत्वं विवक्षितमस्तु नोपाधिपदवाच्यः प्रवृत्तिनिमित्ताभावात्
दूषकता च तस्य व्यभिचारोन्नायकतया तत्र व्यभिचारोन्नायकत्वसन्दे-
पाधित्वं अप्रयोजकसाध्यव्यापकव्यभिचारिणि स्पष्टमुपाधित्वापत्तेरिति ।

सेयं व्याप्तिर्न भूयोदर्शनगम्या दर्शनानां प्रत्येकमहेतुत्वात् व्याप्य

भिन्नाभिन्नां क्षणिकानां भेदग्रहाभावात् । न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधीहेतवः प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यं समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुरतः कथं संस्कारेण व्याप्तिज्ञानं जन्येत अन्यथातिप्रसङ्गः । किञ्च सम्बन्धभूयोदर्शनं भूयःसु स्थानेषु दर्शनं भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा एकत्र रूपरसयोर्गन्धत्वघटत्वयोश्च व्याप्तिग्रहात् एकत्रैव धाराधारिके सद्दीपत्वङ्गात् भूयस्त्वस्य त्रित्वचतुरादित्वेनाननुगमाच्च । अपि च पार्थिवत्वलोहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् तर्कसहकृतं तथेति चेत्तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात् किं भूयोदर्शनेन न च तेन विना तर्क एव नावतरति प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भवात् नन्वेवमेतस्य तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात् ज्ञातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनकव्याप्तिज्ञाने तर्कं विनैवातो नानवस्थेति चेत्तर्हि व्यभिचारात् सोऽपि व्याप्तिग्रहे हेतुः न चैतद्भावदन्तरजातिलक्षणा सामान्यप्रत्यासत्त्या सर्वोपसंहारादविनाभावग्रहः सामान्यरूपता च सकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेन्न सामान्यस्य हि प्रत्यासत्तित्वं ज्ञायमानस्य न तु सामान्यतया ज्ञातस्य तदनभ्युपगमाच्च । न च काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यं द्वितीयादिदर्शनेऽपि शङ्कातादवस्थ्यात् । ननु निरुपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः तद्देशकालसन्निहितघटादीनामुपाधित्वशङ्कानिरासः कस्यचित् साधनव्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्वज्ञानेन स्यात् तच्च भूयोदर्शनं विना नावतरतीति चेन्न व्यापकोपाधिव्यतिरेकस्यानुमानाधीनज्ञानत्वेनानवस्थाप्रसङ्गात् । अथ साध्यसाधनसहचरितधर्मान्तराणामुपाधित्वसंशये न व्याप्तिग्रहः स्वतस्तेषामनुपाधित्वज्ञानं भूयोदर्शनाधीनसाध्याव्यापकत्वज्ञाने तदेतदर्थं भूयोदर्शनापेक्षा अत एव यावता दर्शनेन तन्निश्चयः तावद्भूयोदर्शनं हेतुरिति न वारसंख्या-

नियमो न वाऽननुगमः यद्यपि व्याप्तस्य साध्यव्याप्यत्वसाधनाव्याप-
कत्वसंशयो नान्यव्याप्तिग्रहप्रतिबन्धकस्तथापि तदाहितव्यभिचार
संशयः प्रतिबन्धक इति तद्विधूननमावश्यकमिति चेन्न अयोग्योपाधि
संशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् स च न भूयोदर्शना
द्याप्यनुमानाद्वेत्युक्तम्। अपि च भूयोदर्शनाहितसंस्कारो न बहि-
रिन्द्रियसहकारी तद्व्यापारं विनापि च सहचारादिज्ञानवतो व्याप्ति
ग्रहात् नापि मनसः इन्द्रियादिबहुयोदर्शनजन्यसंस्कारस्य तत्सम्ब
न्धस्य वा प्रमाणान्तरत्वापत्तेः तस्मात् परिशेषेण सकृद्दर्शनगम्या
सा तथाहि साध्याभावो व्याप्तिः अभावस्य केवलाधिकरणं तत्काल
सम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा तच्च प्रथमदर्शनेनावगतमेव चक्षु
रादिना न चाधिकस्तदभावोऽस्ति न च प्रतियोगिज्ञानमधिकरणादि
ज्ञानजनकं येनोपाधिज्ञानं विना तन्न स्यात् एवमुपाध्यभावे ज्ञाते किञ्चि
न्न ज्ञातुमवशिष्यते उपाध्यभावव्यवहारस्तु तद्विषयमपेक्षते दीर्घत्वादि
व्यवहारवदवधिज्ञानं नन्वेवं रासभसम्बन्धतुल्यवह्निधूमसम्बन्धज्ञाना-
देवानुमितिः स्यादिति वाच्यम् उपाधिसत्त्वे सत्युपाधितद्व्याप्येतर
सकलतदुपलम्भकसमवधाने योपाध्यनुपलम्भसहितस्य केवलाधिकरण
ज्ञानस्यानुमितिहेतुत्वात् व्यवहारहेतुत्वाच्च। नन्वेवं प्रथमदर्शनेन
व्याप्तिनिश्चयादिशेषदर्शने सति रासभादिसंशयवत् तत्संशयो न स्या-
दिति चेत् व्याप्तिज्ञानानन्तरं किं विघटनम्, एवोपाधिर्व्यभिचारोपाधित्वेन
न ज्ञात इतिशङ्कया, उद्भूतव्याप्यादपि संशयः अतस्तत्र भूयोदर्शने-
नोपाधिनिरासद्वारा व्यभिचाराभावग्रहापनीयते। यद्वा ज्ञानप्रामाण्य
संशयाद्व्याप्तिसंशयः यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्
प्रामाण्यसंशयाहित तत्संशयो न त्वग्रिमसंशयानुरोधेन तत्र घट
ज्ञानमेव न जातमिति कल्प्यते तथेहाप्युपाध्यभावस्य व्याप्तित्वात् तस्य
च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वात् व्याप्तिग्राहका-
न्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात् तन्निश्चये

प्रामाण्यसंशयादेव तत्संशयः । नन्वेवं रासभेऽपि प्रथमं व्याप्तिपरि-
च्छेदः स्यादिति वाच्यं तत्र व्याप्तेरभावात् प्रत्यक्षज्ञाने विषयस्य हेतु
त्वात् क्वचिदसंसर्गाग्रहात् तथाव्यवहारो दोषमाहात्म्यात् नच्चा-
व्यापि तथारोपे सति निमित्तानुसरणं ननु निमित्तसत्त्वीत्यारोप
इत्यभ्युपगमात् । केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्य
सामानाधिकरण्यं साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं
वा व्याप्तिस्तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथमं
मवगतमेव । महानसे योऽत्यन्ताभावोऽन्योन्याभावो वावगतस्तस्य प्रति
योगी न वह्निर्न वा वह्निमानित्यनुभवात् रासभे तथावगमेऽप्ययं
न बाध्यत इति तन्न एवं हि तद्वह्नितद्धूमयोरेव व्याप्तिः स्यात् ननु
धूमत्वावच्छिन्नत्वावच्छेदेन नच तदनुमानोपयोगि वह्नित्वं वह्निमत्त्वं वा
न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति मैवं प्रकृत
साध्यव्यापकसाधनाव्यापकोपाधि साधनस्याभिमतेन सर्वं प्रकृतसाध्य
सम्बन्धितावच्छेदकं विशेषणं नोपाधिः उभयथापि तदभावो न व्याप्तिः
सिद्धासिद्धिभ्यां तन्निषेधानुपपत्तेः किन्तु यावत्स्वव्यभिचारिव्यभिचारि
साध्यसामानाधिकरण्यमनौपाधिकत्वं तस्य च प्रथमं ज्ञातुमशक्य-
त्वात् । किञ्च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किन्तु व्याप्तित्वेन तच्च
उपाध्यभावत्वं नच उपाधेर्ज्ञाने तदभावत्वेन ज्ञानं सम्भवति विशे-
षदर्शनसाध्यत्वादिभिर्व्यभिचारस्य तत्र नियमतः प्रथममुपाधिधी-
रिति । व्यक्तीनां प्रतियोगिनां व्यवहारहेतुः साभाव्यज्ञानवत्त्वस्तु
तावदेवं तथापि तदभावो ना व्यवहारे उपाध्यभावज्ञानाधीनानु-
मितिः स्यादेव उपाधिज्ञानं विनापि नचैवं । वस्तुतस्तु विशेषादर्शने
सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात् प्रथमदर्शनेन न
व्याप्तिनिश्चयः । अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रति-
बन्धकः प्रामाण्यसंशयस्य निश्चयाप्रतिबन्धकत्वात् अन्यथा संशयोत्तरं

क्वापि निश्चयो न स्यादिति चेन्न व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः किन्तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात् न तु संशयसामग्रीतो निश्चय इति। किञ्च यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः एवं भूयोदर्शनमपि संशायकं सर्वत्रानवस्थाग्रस्त एवेति कथं व्याप्तिग्रहः।

अत्रोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकं ज्ञानं निश्चयः शङ्का च सा च क्वचिदुपाधिसन्देहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात् तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतःसिद्ध एव तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत् न यावदाशङ्कं तर्कानुसरणात् यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः तथाहि धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नित्यश्च स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति क्वचिद्वह्निं विनापि भविष्यति अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात् सर्वत्र स्वक्रियाव्याघातः स्यात् यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः तृप्त्यर्थं भोजनस्य परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्सम्भवात् तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकं शङ्कायां न नियतोपादानं नियतोपादाने च न शङ्का तदिदमुक्तं सैव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति नहि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते तत्कारणं सन्देग्धि चेति एतेन व्याघातो विरोधः स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तं स्वक्रियाव्याघातस्य शङ्काप्रतिबन्धकत्वात् अतएव व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुत इति खण्डनकारमतमप्यपास्तम्। नहि व्याघातः शङ्काश्रितः किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति न वा विशेष

दर्शनात् क्वचित् शङ्कानिवृत्तिरेवं स्यात् न चैतादृशतर्कावतारो भूयो
दर्शनं विनेति भूयोदर्शनादरः ननु स स्वतन्त्रप्रयोजकः अतएव न तदा
हित संस्कारो न मानान्तरं तर्कस्याप्रमात्वात् तत्र प्रत्यक्षव्याप्तिज्ञाने
हेतुः तदभावेपि शब्दानुमानाभ्यां तद्ग्रहात् । ननु सहचारदर्शनव्यभि-
चारादर्शनवद्व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधा
रणमिति न ततोपि व्याप्तिनिश्चय इति चेन्न स्वरूपसतोरेव तयो व्याप्ति
ग्राहकत्वात् सत्तर्काद्व्याप्तिप्रमा तदाभासात्तदप्रमा विशेषदर्शनसत्त्व-
त्वासत्त्वाभ्यां पुरुषज्ञानमिव । अपरे तु यत्र तर्कं व्याप्त्यनुभवो
मूलं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं हेतुः तत्र न तर्कान्तरा
पेक्षेति नानवस्था इष्टिश्च भावनाभावाविरुद्धाविरुद्धसाधनतानुमिति
हेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात् तन्मूलानुभवमूलाभा-
वेपि व्याप्तिस्मरणसम्भवस्येति । यत्नादिसिद्धकार्य्यारम्भाभावविरो-
धादिमूलाः केचित्तर्का इति तन्न तत्र प्रमाणानुयोगेऽनुमान एव पर्य्य-
वसानात् । नच व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकल्प
ज्ञानमिति वाच्यम् अनुपपत्तेरप्यनुमानत्वात् । अन्ये तु विपक्षबाधक
तर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति तदपि न तर्कस्या
प्रमाणत्वात् । व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी
स इति चेन्न अनवस्थाभयेन तर्कं विना व्याघातात् यत्र शङ्कानिरह
स्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात् । यत्तु योग्यानामुपाधीनां योग्या
नुपलब्ध्याभावग्रहः अयोग्यानान्तु साध्यव्यापकत्वसाधनाव्यापकत्व
साधनादभावग्रह इत्यनौपाधिकत्वं सुग्रहमिति तन्तुच्छम् अनुमानेन
तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात् । येषामनुकूलतर्कं विनैव
सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति तेषां पक्षेतरत्वस्य साध्य
व्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत अनुमानमात्रोच्छेदकत्वादेव पक्षे-
तरो नोपाधिरिति चेत् भ्रान्तोसि नहि वयमुपाधित्वेन तस्य दोषत्व-
मावक्ष्महे साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्त्तकतया

व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य दर्शितप्रायत्वात् अपि च साध्यवह्निसंयोगः धूमप्रतिरिक्तादीन्द्रियसन्निकर्षसमवायादि जनकत्वादित्यपि प्रयोजकत्वाच्च साधकं तत्र व्याप्तस्य पक्षधर्मत्वे किम्प्रयोजकं नाम तत्रापि बाधकतर्काभावाच्च तत्र व्याप्तिग्रहस्य प्रयोजकत्वमिति ।

उक्तव्याप्तिप्रकारेऽन्योन्याभावगर्भे व्याप्तिरनुमितिहेतुर्गौरवात् व्यक्तीनामननुगमः । एतेनोपाधिकत्वलक्षणं तन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारवत् हेत्वाभासान्तरं स्यात् न तु व्याप्यत्वाभावत्वेनासिद्धिरिति चेत् तज्ज्ञानस्योपजीव्यत्वमपि न स्वतो दूषकं किन्त्वस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यत्र साध्यव्याप्यत्वज्ञाने प्रतिबन्धकमतिप्रसक्तेः व्यभिचारज्ञानस्य सद्धेतुत्वात् तद्वत्तया तथानोपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुरित्युक्तम् । तथा च व्यभिचारज्ञानद्वारा सदूषणः स एव परमुखनिरीक्षकतया सिद्धसाधनवत्पृथक् कथं न व्यभिचारस्य व्याप्तित्वे व्यभिचारतदभावत्वेनासिद्धिः स्यादिति वाच्यम् । साध्याभाववद्वृत्तित्वं हि व्यभिचारः तदभावश्च नाव्यभिचारः केवलान्वयिन्यभावात् । किन्तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं न चानयोः परस्परविरहत्वमिति ।

व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः अथान्यथा पर्वतीयधूमे व्याप्तिग्रहे तस्मादनुमितिः सा चेन्द्रियसम्बद्धविशेषणतातिरिक्तैव वा तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति वदन्ति तदपरे न मन्यन्ते तथा हि धूमत्वावच्छिन्ना व्याप्तिः सन्निकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते ततः स्मृता सा तृतीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते ततोऽनुमितिः तदनभ्युपगमेऽपि . सन्निकृष्टधूमविषये धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवस्तथैव व्याप्तिस्मरणं ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः व्याप्त्यनुभवजन्यसंस्कारपक्षधर्मताज्ञानात् तावन्मात्रकारणत्वेनानुमितिहेतुत्वात् ।

गवादिपदेष्वपि धूमत्वेनानुभवतत्संस्कारवत्तदर्थानुभवानामेकप्रकारक-त्वेन हेतुहेतुमद्भाव इत्यपूर्व्वं वक्ष्यते तत्र योग्यतादिवशादपूर्व्वस्यापि लाभोऽनुमाने तु पक्षधर्म्मतावशात् धूमो वह्निव्याप्य इत्यनुभवो। ननु सर्व्वो धूमो वह्निव्याप्य इति येन सर्व्वभानार्थं तत्स्वीकारः।

अथ वह्निमानयमित्यनुमितिः विशेष्यज्ञानसाध्या विशिष्टज्ञानत्वा-दिति पर्व्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा क्वचिद्धूमस्यापि व्यापकत्वादिति चेन्न विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रका-रकज्ञानस्यावच्छेदकत्वेन हेतुत्वात् तच्च धूमत्वेन ननु विशेष्यज्ञानमपि तथा गौरवात् गौरवत्वमिति विशिष्टज्ञाने गुणवद्विशेष्ये विशेषणे सन्नि-कर्षस्य कारणं ननु निर्व्विकल्पकमानाभावात् विशिष्टज्ञानत्वमेव मानमिति चेन्न दृष्टान्ताभावात् दण्डी पुरुष इत्यत्र विशेषणांशेऽन्य-त्वानभ्युपगमात् विशिष्टवैशिष्ट्यज्ञानत्वात् अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्व्वज्ञः स्यात् तथाच परकीयज्ञानविषये घटत्वं न वेति संशयो न स्यात् प्रमेयत्वेन तदन्यतरनिश्चयात्। प्रमेयत्वेन घटं जानात्येव घटत्वं तस्य न जानाति इति चेन्न तत् किं घटत्वं न प्रमेयं येन तन्न जानीयात् सकलघटवृत्तिधर्म्मस्य प्रमेयत्वेन तज्ज्ञान-सम्भवात्।

उच्यते यदि सामान्यलक्षणा नास्ति तदानुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य ज्ञानाभावेनाभावात् सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते। यत्तु पाकादौ चिकीर्षा सुखादौ इच्छा न स्यात् सिद्धे इच्छाविरहात् असि-द्धस्याज्ञानात् तस्मात् सुखत्वादिना ज्ञातेषु सर्व्वेषु सिद्धं विहाया-सिद्धे इच्छा भवतीत्यभ्युपेयं न च असिद्धस्य ज्ञानानि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिसम्भवादसिद्धे तयोरुत्पत्तेः न व्याप्तिग्रहः तस्मात् प्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्य्यकारणभावात् न तु समानविषयत्वे-

नापि कश्चिद्दोषकल्पनात् समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाद्वयोरभावात् तस्यावश्यकत्वेन गौरवाच्चेति परसिद्धान्तात् । न च सर्व्वज्ञत्वे संशयो न स्यादिति दोषः घटो न वा इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि तच्च न तत्र स्वसामग्रीविरहात् अतो घटत्वादिसकलविशेषज्ञानेपि स घटो न वेति संशयइति ।

उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते ।

तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः अनौपाधिकत्वज्ञानञ्च न व्याप्तिज्ञाने हेतुरतो व्यापकत्वादिज्ञानेनान्योन्याश्रयः । यद्वा व्यापकत्वं तन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वञ्चाव्यापकत्वं प्रतियोगित्वञ्च तदधिकरणानधिकरणत्वमिति वदन्ति तन्न साधनपक्षधर्म्मावच्छिन्नसाध्यव्यापकोपाधिव्याप्तेः न च तयोरनुपाधित्वं दूषकताबीजसाम्यात् मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति पक्षेतरत्वेऽतिव्याप्तिश्च न च व्यतिरेके पर्व्वतेतरान्यत्वादिरपि इतरान्यत्वस्याप्रसिद्धिवारणार्थं पर्व्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः बाधोन्नीतस्याप्यनुपाधितापत्तेः न चेष्टापत्तिः इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्तिग्रहे तस्य सार्थकत्वात् । वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् अस्तु तथा तथापि पक्षातिरिक्ते साध्यव्यापकतया ग्राह्यादुपाधेर्दूषकत्वं न च तथाप्यस्ति अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत विपक्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र पक्षस्यैव विपक्षत्वात् नतु पर्व्वतेतरत्वादेरिति चेन्न नहि वस्तु विपक्षाव्यावर्त्तकविशेषणशून्यं सर्व्वत्र प्रमेयत्वादेः सत्त्वात् तत्रोपाधेरिति विशेषणे सिद्ध्यसिद्धिव्याघातः तथापि च साध्यव्यापकत्वसाधनाव्याप-

कत्वे तत्र स्व इति तच्छान्यथा पक्षे साध्यव्यतिरेकिणो हेतोर्व्यभिचार
एव व्यभिचारे आवश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात्
तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्। अत एवानुमानमात्रो-
च्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तं दूषणासमर्थत्वेन
जातित्वाभावात् एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्
उपाधित्वाभावेऽपि दूषणसमर्थत्वात्। अथोपाधिः स्वव्यतिरेकेण सत्-
प्रतिपक्षोत्थापकतया दूषणं पक्षेतरव्यतिरेकश्च न साध्याभावसा-
धकोऽसाधारणत्वात् न तु व्यभिचारोन्नायकतया दूषणं यथा हि साध्य
व्यापकोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्येन
व्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् व्याप्तिग्राहकस्योभय-
त्रापि साम्येन विनिगमकविरहात् तस्माद्यथा साध्यव्याप्येन हेतुना
साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साध
नीयो व्याप्तिग्रहस्तौल्यादिति दूषकताबीजं सोऽयं सत्प्रतिपक्ष एवेति
नैवं एवं हि सत्प्रतिपक्षोपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत्
किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधार-
ण्यात्। ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात्
ननु हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः प्रत्यक्षे वह्नौ कृतकत्वे-
नानुष्णत्वे साध्ये ऽतेजस्त्वादेरुपाधित्वसम्भवादिति चेत् न तेजोमात्र
पक्षत्वे ऽतेजस्त्वं विनान्यस्य उपाधेरभावात् किञ्च पर्वतावयववृत्त्यन्य-
त्वं पर्वतेतरद्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वतान्यत्वादिक-
मुपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात् व्यतिरेकिणा सत्प्रतिपक्ष-
सम्भवाच्च न चासाधारण्यं तत्रापि सत्प्रतिपक्षोत्थापकतया दोषत्वात्
तस्मादुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः किन्तू-
भयत्र व्यभिचारसंशयः तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूष-
कत्वं तच्च पक्षेतरेऽप्यस्ति तदुक्तमुपाधेरेव व्यभिचारग्रहेति। अथ तु
वोक्तन्यायेन सर्वानुमानभङ्गभिया पक्षेतरोऽनुपाधिः तथापि सन्दिग्ध

भतिव्यापकम् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधि
त्वं दूषकताबीजस्य व्यभिचारोन्नायकस्य सत्प्रतिपक्षस्य वा साम्येन
विषमव्याप्तस्याप्युपाधित्वात् यथा दूषकतायां साध्यव्यापकत्वस्य प्रयो-
जकत्वम् । अथ साध्यप्रयोजकधर्मोपाधिः प्रयोजकत्वञ्च न न्यूना
धिकदेशवृत्तेः कस्मिन् व्यभिचारेण विनापि भवत तदप्रयोजकत्वात्
समव्याप्तस्यैव प्रयोजकत्वमिति चेत् न दूषकतौपयिकं हि प्रयो
जकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति
तदेव प्रयोजकं तदधिकं व्यर्थत्वात् । यथोपाधिः स उच्यते यद्धर्मो-
ऽन्यत्र प्रतिबिम्बते यथा जवाकुसुमं स्फटिकलौहित्य उपाधिः तथा
चोपाधिधर्मो व्याप्यत्वं हेतुत्वाभिमते तत्रापि तेनानुपाधिः तच्च
साध्यव्यापकत्वे च दूषकत्वमिति साध्यव्यापकतापीष्यते तथाच समव्याप्त-
स्यैवोपाधित्वमिति चेत् न किं विषमव्याप्तस्य दूषकताबीजाभावादो-
पाधिशब्दवाच्यत्वं तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्वा नाद्यः
तत्रापि व्यभिचारोन्नायकत्वात् नापरः यदि लोके समव्याप्तस्यैवा-
न्यत्र स्वधर्मप्रतिबिम्बजनकस्योपाधिपदप्रयोगः साम्याद्युपाधिना इत-
स्मिन्नादौ स्वभावादुपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिक
व्यवहारार्थमुपाधिव्युत्पादनं किन्त्वनुमानदूषणार्थं तच्च साध्यव्यापकत्वे
सति साधनाव्यापकत्वमात्रमिति शास्त्रे सर्वत्रोपाधिपदप्रयोगः । अन्ये
तु यदभावोऽव्यभिचारविरोधी स उपाधिः नच विषमव्याप्तस्याभावो
ऽव्यभिचारं विरुणद्धि तस्याभावेऽपि व्यभिचारात् अपि त्वनित्यत्व
व्यापकं श्रवणत्वं शब्दव्याप्यत्वं न पार्थिवत्वगुरुत्वयोर्व्याप्तिरिति
समव्याप्तिकस्य च व्यतिरेक तथा नहि साध्यव्यापकव्याप्यीभूतस्य
व्याप्यं यत्तत् साध्यं व्यभिचरति व्यभिचारे चान्ततः साध्यमेवोपाधिः
स्वभेदेऽपि साध्याव्यापकत्वात् साधनाव्यापकत्वादिति केचित् तन्न
तथापि व्यभिचारे साध्यव्याप्यव्याप्यत्वं तद्व्याप्यव्यापकत्वाद्वा न न
साध्यव्यापकव्याप्यत्वमपि भवत्येव व्यभिचारस्य दर्शितत्वात् तच्च साध्य

व्याप्यव्याप्यसमेवानौपाधिकत्वं साध्यव्याप्यमित्यत्रापि एवमौपाधिकत्वं तदेव वाच्यं तथा चानवस्थेति अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापके विशेषणं दत्तमेव किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं नतु व्यतिरेके भवत्वेवेत्येतद्दूषणं विरुद्धत्वादेरप्यदोषत्वापत्तेः नापि पक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्। शब्दोऽभिधेयः प्रमेयत्वादित्यत्र आकाशत्वस्योपाधित्वापत्तेश्च शब्दधर्म्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र शब्दादौ तत्राकाशत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत्। आर्द्रेन्धनवत्त्वादावुपाधौ पक्षविधत्वाद्द्रव्यधर्म्माभावाच्च। अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः प्रागसत्त्वे प्रागभावत्वमुपाधिरिति तन्न पक्षधर्म्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात् सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नस्य व्यर्थत्वप्रसङ्गाच्च। किञ्च यदा दशेमि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथाप्यर्थान्तरं केवलसाध्ये हि विवादो नतु विशिष्टे। अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न व्यापककालत्वात् प्रथमं साध्यव्यभिचारस्यैवोद्भावनात् असिद्धावुपाधिरिति चेत् तर्हि प्रकृतानुमाने नोपाधिदूषकं स्यात् किन्तु साध्यव्यभिचारहेतुत्वेन पक्षधर्म्मावच्छिन्नसाध्यव्यापकव्यभिचार एव पक्षसम्बन्धीयोगेनोपाधिः। स्यादेतत् पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः पर्यवसितं साध्यं पक्षधर्म्मतावच्छेदकं यथा शब्दोऽनित्यत्वादिविशिष्टशब्द

धर्म्मेतिरिक्तधर्म्मवान् मेयत्वादित्यत्र पर्य्यवसितं यत्साध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः तदुक्तं याद्दृक्साध्यनियमस्तुतोऽपि कथकेनोपाधिरुद्भाव्यः पर्य्यवसितं नियमयन् दूषकतावीजसाम्राज्यादिति । अनेन पक्षधर्म्मसाधनावच्छिन्नसाध्यव्यापकोपाधिः संगृहीतः तादृश साध्यस्य पर्य्यवसितत्वादिति तन्न एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे त्र्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र नित्यार्थं द्रव्यसमवेतत्वमुपाधिः स्यात् भवति हि नित्यद्रव्यसमवेतत्वं पर्य्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च नित्य पक्षधर्म्मताबल लभ्यसाध्यसिद्धौ निरुपाधेरुपाधिः तदसिद्धौ च तस्य व्यापकः नहि सोपाधौ पक्षधर्म्मताबलात् साध्यं सिध्यति यस्य व्यापकउपाधिः स्यादिति । अत्रोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः तत्तयानु पर्य्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं यद्धर्म्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्य्यवसितं साध्यं स च धर्म्मः क्वचित् साधनमेव क्वचिद्द्रव्यत्वादि क्वचिन्महानसत्वादि तथाहि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुटएव व्यापकव्यभिचारिणोव्याप्यव्यभिचारनियमात् साधनावच्छिन्नपक्षधर्म्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् अतएव नाथं ब्रूते विशेषसाध्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति पक्षधर्म्मताबलात् अन्यथा प्रतीतेरपर्य्यवसानात् नच पक्षधर्म्मताबलात् प्रकृतसिद्धावर्थान्तरम् । यथा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभि-

सादित्वाग्नेरुष्णत्ववत् तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत् अव्यभिचारस्य तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि। यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः तत्त्वञ्च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुनरुक्तेर्व्याघाताभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिवद् दोषः नन्वेवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्निरस्ताव्यापकत्वात् नैव पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तं नाको क्षीते नानुकूलतर्कोऽस्त्येवेति एवं पर्वतावयवकत्वान्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् अतएव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं अथवहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं मित्रातनयश्यामत्वे शाकपाकजत्वं अध्वानित्यत्वे भावत्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षात् अनन्यथासिद्धान्वयव्यतिरेकतोविषयत्वात् कारणतावगमेन घटोत्पन्न प्रसङ्गेन साध्यव्यापकतानिश्चयात् तत् किं कार्यकारणयोरेव व्याप्तिः तथाच बहुधा व्याकुलीस्यादिति चेन्न तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात् यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपधायकत्वात् यदा च साध्यस्येवानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः। यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहकसाम्यात् तथाचोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्त्तितव्यम् नचैवं। तथाच पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति तन्न

तथापि हि साध्यव्यापकतया पक्षमात्रव्यावृत्तस्य हेतुव्यभिचारसंशयाधायकत्वेन दूषकत्वं स्यादेव । ननु पक्षेतरोपाधिस्थानुकूलतर्को यदि नास्ति तदा तदभावादेव व्याप्तिग्रहः यद्यस्ति तदा साध्यव्याप्यव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषकं तत्र व्याप्तिग्राहकस्याप्यनुभवसहकृतोपाधिरपि तदभावोन्नयनेन दोष इति वाच्यं उपाधेरात्मकत्वाभावेऽनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न सोपाधौ विकल्पः साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो बाधः तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवकमन्यदेवोपाधिर्व्याप्यक तथानुकूलतर्काभावोऽन्यानवस्थाइति उभयोरपि भिन्नत्वाभावात्पुनरुक्तत्वम् । यत्तु बाधोन्नायको यस्य साधनस्य साध्यं निवर्त्तते स धर्मस्तत्र हेतावुपाधिः तस्य धर्मिण्यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा काले ध्वंसवत्त्वं व्यावर्त्तते हि तत्रान्यथा धूमवत्त्वमयोगोलके अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे ध्वंसे भावत्वव्यावृत्त्या ध्वंसे अनित्यत्वनित्यत्वयोः सम्बन्धो निवर्त्तमानः पक्षधर्मतावत्कार्यनित्यत्वाभावमादाय निवर्त्तते तथा बाधादुद्भूतरूपवत्त्वं निवर्त्तमानं वह्निमत्त्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय निवर्त्तते तथा चोभयत्रापि पक्षे बाधाभावलिङ्गात् साध्यसाधनसम्बन्धाभावोऽस्तीति अत एव बाधानुनीतपक्षेतरस्यानुपाधित्वं व्याप्यत्वासिद्धिवत् व्यतिरेकस्य साध्याभावसाधकत्वादिति । यत्तूपाधिमात्रस्य व्यतिरेकिधर्मत्वं पक्षेतरोऽपि कश्चिदुपाधिः तत्र तदुपाधेस्तु तत्र साध्यव्यापकत्वे सति साधनाव्यापकत्वं न च धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् उभयाव्यवसिद्धेरिति तन्न अनुमितिप्रतिबन्धकत्वाद्विषयतावच्छेदकस्योपाधित्वमिष्ट निरूप्यं तत्र न व्यतिरेकित्वमतिप्रसङ्गात् विशेषणस्य वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च । केचित्तु साधनव्यापकोऽप्युपाधिः कश्चिच्च प्रत्यक्षोपाधिर्हेतुः यथा कार्यमात्रा पृथिवी कठिन

संयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वं नच तत्र स्वरूपासिद्धिरेव दोषः सर्व्वेषामुपाधेर्दूषणान्तरसङ्करादित्याहुः । साध्यस्य चोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिबाधे चेदयसङ्गश्च । स चायं द्विविधः निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकत्वेन संदिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिमत्त्वं नच तेनैव हेतुना श्यामत्वाभावमपि साध्यं तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधनेऽप्यर्थान्तरं श्यामत्वमात्रे विवादो नतूभयत्र अन्यैर्न धूमादन्यलिङ्गकत्वेऽपि वह्निसामग्र्युपाधिः स्यात् तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् अत्र तु मित्रातनयत्वव्याप्यस्य लक्षणसामग्र्या सत्त्वनियमकार्य्यकारणभावादीनां व्याप्तिग्राहकप्रमाणाभावात् यत्रैव साध्यसामग्र्या सह हेतोरव्यभिचार व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिदोपाधिर्नतु सर्व्वत्र इत्युक्तं यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वानुपाधिः यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे । यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोगइति तन्न सन्दिग्धानैकान्तिकवद्व्यभिचारसंशयाधायकत्वेन दूषणत्वादुपाधेरिव व्यभिचारनिश्चयाधायकतया ।

इदानीमुपाधेर्दूषकताबीजं निरूप्यते ।

साध्यस्य व्यतिरेकबाधा सत्प्रतिपक्षत्वेन दूषकत्वं तथा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् नच प्रतिपक्षबाहुल्ये नाधिकबलार्थमुद्भावनं शतमप्यन्धानां न पश्यतीतिन्यायात् एकेनापि

साधकतां प्रतिबन्धाच्च व्याप्तिपक्षधर्म्मतेति बलं तच्च तुल्यमेव नतु भूयस्त्व मपि स्वकार्य्येऽनुमितिदर्शनात् सन्दिग्धोपाधेर्दूषकताभावाच्च तद्व्यति-रेकस्य पक्षे सन्दिग्धत्वात् । अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात् व्यतिरेकेऽसाधारण्यात् पक्षधर्म्मस्योपाधिर्न स्यात् यथा घटो ऽनित्यः प्रमेयत्वादित्यत्र कार्य्यत्वं अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीय-मानत्वादित्यत्राश्रावणत्वं तद्व्यतिरेकस्य पक्षावच्छिन्नत्वात् न चायमु-पाधिः सत्प्रतिपक्षत्वात् अन्यथा दूषकत्वसम्भवाच्च । किञ्च साध्यव्यापक-व्याप्यत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः नह्य-व्यापकव्यतिरेकाद्व्याप्यव्यतिरेकः नापि व्याप्तिविरहरूपतयाऽसिद्धत्वे-नोपाधिर्दूषकः व्याप्तित्वनिरासात् । साध्यनोपाधित्वज्ञानस्य व्याप्ति-धीविरोधित्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धा-वन्तर्भावः । नह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्ति-ज्ञानं प्रतिप्रतिबन्धकमिति युक्तम् । कथं साध्यव्यापकत्वसाध्याव्यापकत्वे विद्यमाने साधनस्य साध्यव्यापकत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यं नहि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत्प्रतिबन्धकं स्यात् किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा । नापि व्यभिचारोन्नायकत्वेन यथाहि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभि-चारित्वमुपाधेरप्यनुमेयं व्याप्तिग्राहकसाम्यात् । नापि साध्यव्यापका-व्याप्यत्वेन व्याप्तिविरहोन्नायकतया साध्यव्यापकाव्याप्यत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

उच्यते आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनेऽव्यापकत्वे निश्चिते दूषकताबीजचिन्तनं यदि हि साध्यसाधनसहचारदर्शने-नोपाधौ साध्यव्यापकताभिमानो यस्य नास्ति तदोपाधित्वनिश्चयाभावात् दूषकत्वेऽपि नास्तीति का बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्ष-तया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्व्वथा साध्यव्याप-

कत्वानिश्चयो वाच्यः तेन विना तेषामभावात्। तस्मादुपाधिनिश्चया-द्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा दूषक व्यापकाव्याप्यत्वेन व्यभिचारोन्नायकतया बाधोन्नेयं वक्तव्यम्। यद्वा साध्यव्यापकताभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयं तत्र साध्या-भाववद्वृत्तित्वमुपाधिरिति वाच्यम् उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रति-पक्षे पूर्व्वसाधनव्यतिरेकवत् अवृत्तिमगगनादेः साध्याव्यापकत्वात् सं-योगादेः हेतोः साधनव्यापकत्वाच्च।

अथोपाध्याभासाः। अव्यापकत्वविपर्य्ययो यथान्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यस्त्वैरत्वम्। अप्रसिद्धसाध्यविपर्य्ययो यथा केव-लान्वयिनि साध्ये प्रमेयत्वादिः। बाधितसाध्यविपर्य्ययो यथा वह्निरनुष्णः कृतकत्वादित्यत्र पाकजत्वम्। पक्षाविपर्य्ययो यथा क्षित्यादिकं सकर्त्तृकं कार्य्यत्वादित्यत्रानुपलब्धिशरीरत्वम् शरीरजन्यत्वव्यतिरेकस्य क्षित्यादेरेवादिपक्षतया भावान्तिद्धेः। पूर्व्वसाधनव्यतिरेको यथा शर्करा रसोऽनित्योऽनित्यवृत्तिगुणत्वात् रसो नित्यो रसनेन्द्रियजन्यनिर्वि-कल्पकविषयत्वात् रसत्ववदित्यादौ पूर्व्वसाधनतायाः प्रयोगानुरोधि-त्वेनाव्यवस्थितत्वात् कदाचिदनित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचि-दनित्यत्वसाधनव्यतिरेकस्येति तत्तुल्यव्यवस्था न स्यात् उपाधेर्नित्य-दोषत्वाच्च। नहि यद्येन सोपाधि तदेव तत्तेनानुपाधित्वमप्यत्र स-म्भवति ननु सत्प्रतिपक्षोच्छेदः पूर्व्वसाधनव्यतिरेकस्यानुपाधित्वे तीव्रं स्थापनाया वचाभासत्वं तत्र पूर्व्वसाधनव्यतिरेकस्य साध्याव्यापक-त्वेनानुपाधित्वात् न च पूर्व्वहेतोरत्यन्तस्वासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् अन्यतराभावविशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्व्व-साधनव्याप्यव्यतिरेको यथा शब्दं कार्यानुमाने नित्यत्वादिः। पक्ष-विपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्व्वतमहाह्रदान्यतरान्यत्वम्। पक्षेतरसाध्याभावो यथा चैव पर्व्वतेतरवह्निमत्त्वं तच्चात्र व्यर्थविशेषणा-

त्वं दूषणं तत्त्वेऽप्युपाधेराभासत्वात् । तत्तु यथा यथैव पर्व्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ।

व्याप्त्यनन्तरं पक्षधर्म्मता निरूप्यते ।

तत्र न तावत् सन्दिग्धसाध्यधर्म्मत्वं पक्षत्वम् सन्देहं विना विशेषणं परामर्शपूर्व्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तदा नाशात् लोपलक्षणम् अव्यापकत्वापत्तेः नापि साधकबाधकप्रमाणाभावः उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् साध्याभाववत्त्वं तथा बाधकप्रमाणाभावस्य व्यर्थत्वात् ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेनानुमित्यनुत्पादात् नापि साधकप्रमाणाभावः श्रोतव्यो मन्तव्य इति श्रुत्या आगमनिश्चयकश्रवणानन्तरं मननबोधनात् प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात् । अथ सिषाधयिषितसाध्यधर्म्मा धर्म्मी पक्षः तथाहि मुमुक्षोः श्रवणादावगतेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविषयकानुमितीच्छयात्मानुमानम् अतएव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचनमेव विरोधः अनुमित्साविरहाभ्यां तदुपपत्तेरिति चेन्न सन्दिग्धपरामर्शपूर्व्वं सिषाधयिषाया अप्यभावात् व्याप्यतयाप्यनिरूपणात् सिषाधयिषाविरहेऽपि घनगर्ज्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शवशेनानपेक्षितानुमानदर्शनाच्चेति । उच्यते सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभाव स्तत्र विशिष्टाभावात् पक्षत्वं यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

पक्षधर्म्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यत्वावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्म्मताज्ञानं तथा साध्यवान् परामर्श

हेतुत्वेनावश्यकत्वाच्च एवञ्च धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञान द्वयादेवानुमितिरस्तु । न चानुमितिं प्रति व्याप्तिज्ञानमेव हेतुर्लाघवात् उपजीव्यत्वाच्चेति वाच्यं तस्यानुमितेः पूर्व्वमसिद्धेर्युगपदुत्पत्त्यभावात् । अथ यथा सत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स चायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वसाधारणधर्म्मदर्शनाद्व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्र्याः क्लृप्तत्वादिति स एवानुमितिहेतुरिति चेत् न प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात् अनुमितिरेवोत्पद्यते न तु व्याप्त्यभेदप्रत्ययः अन्यथा तथापि परामर्शानन्तरं परामर्शान्तरम् तदनुव्यवसायो वा भवेन्नत्वनुमितिः । अथ धूमो वह्निव्याप्य इति स्मरतः पर्व्वतीयधूमेन्द्रियसन्निकर्षे प्रथमत एव व्याप्तिधूमत्वयोर्वैशिष्ट्यं भासते विशेषणज्ञानस्य पूर्व्वं सत्त्वात् तत्र यत्र, चाप्रत्यक्षाद्वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्म्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनाऽन्यथापि तथेति चेत् न इन्द्रियासन्निकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्तेन विनानुमित्यनुत्पादापत्तेः । प्रत्यक्षसामग्र्याश्च तत्रापि सत्त्वात् न चानुमानात् तत्र परामर्शेऽनवस्थानात् अथ यथा स देवदत्तो गौरो न वा परमाणुरूपाधिकरणं न वेति संशयोत्तरं सत्त्वेऽपि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशादुत्पद्यते यथा वा निद्रासहकारेण वाह्यस्वप्नानुभवः तथैवापि प्रत्यक्षेणोपनीतविशेषे व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत् न व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः तदेव हि प्रमाणान्तरं यदसाधारणं सहकारि समासाद्य मनो बहिर्गोचरां प्रमां जनयति यथेन्द्रियादि संशयस्वप्नौ तु न प्रमे इति न लिङ्गादेः प्रमाणान्तरत्वम् । अथ तथापि कथं न धूमो वह्निव्याप्य इति व्यवहारः तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यं

तच्च कृतधूमे धूमत्वेन वह्निव्याप्यत्वानुभवात् तत्र लभ्यते धूमत्वेन व्याप्त्यनुभवः सम्भवति अतएव यो वह्निव्याप्यवान् सोऽयमिति वह्निमान् इति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा । अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेन्न धूमो वह्निव्याप्य इति निश्चये विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशया भावात् अन्यथा परामर्शेऽपि कुतो न स्यात् संशयेन प्रतिबन्धादिति चेत्तुल्यं तत्र सामान्यनिश्चयस्य सामान्यसंशयनिवर्त्तकत्वाद्धूमसामान्ये एव संशयो मास्तु विशेषसंशयस्तु विशेषनिश्चयनिवर्त्तनीय इति धूम विशेषे संशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यं यत्र हि यद्धावच्छेदकधर्मदर्शनं तत्र न तत्संशयः तच्च सामान्ये विशेषे चेति । वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्म्मताज्ञाने चानुमिति र्भवत्येव । ननु भावोऽभावो वा उभयथापि प्रमेयमित्यत्र भावत्वा- भावत्वयोर्व्याप्यतावच्छेदकयोरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूप स्यान्यतरत्वस्य लिङ्गत्वाभावादिति चेत् न भावत्वाभावत्वान्यान्यधर्म्म वत्त्वस्य तत्र लिङ्गत्वात् एवं धूमालोकान्यतरत्वमपि लिङ्गम् । अथ व्यतिरेकज्ञानं तदुत्पत्तिप्रतिबन्धकं तन्निश्चयसाध्यं तथाच पक्ष धर्म्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम् अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेन्न धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्म्मता ज्ञाने च सति विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानं किन्तु अनुमितेरे- वोत्पत्तिः तत्सामग्रीसत्त्वात् अतो व्याप्यभेदज्ञानं नानुमितिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात् । तत्र धूमत्वप्रकारेण व्याप्तिस्मरण पक्षधर्म्मताग्रहे इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्रमवतोऽनुमित्यापत्ति रतो विशिष्टज्ञानं हेतुरिति वाच्यं धूमत्वस्य विशेषस्य दर्शनेन तादृश भ्रमानुत्पत्तेः तत्रानुमितिसद्भावादेव अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्शएव कुतो न भवति अस्तु वा व्याप्यतया पक्षधर्म्म तया चावगतस्य भेदाग्रहएवानुमितिहेतुः परामर्शहेतुतया तस्या

बाधकत्वात् अतएवासन्निकृष्टधूमज्ञानादप्यनुमितिः। नचैवं गौरवं तदा विशिष्टज्ञानानुपस्थितेः। नच जनकज्ञानविरोधिनो ज्ञानस्य प्रतिबन्धकत्वात् भेदग्रहेण प्रतिबन्धक इति वाच्यम् अभेदज्ञानस्याजनकत्वात् तथापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च। अथ गोत्वं मधुरत्वाद्यन्तरजाति र्वा लिङ्गं न स्यात् तद्गतधर्म्मान्तरस्याभावात् अतएव तस्य विलक्षणत्वात् इति चेन्न व्यक्तेरेव तत्र प्रकारत्वात् नहि गोगोत्वमिति ज्ञानयोरविशेषः अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्तिग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च नचैवमनवस्था तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापत्त्यासम्भवात्।

यत्रोच्यते पर्वत आलोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं तत्रानुमितिः नच धूमत्वेनालोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गं नच तद्ज्ञानं द्वयाद्यनुमितिदर्शनात् न तथेति वाच्यं धूमालोकान्यान्यत्वज्ञानं विना तथापि तत्र व्याप्यतानिश्चयेन तदर्थं तद्विशेषावधारणत्वादिति चेन्न नहि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारादारकविशेषणवत्वाच्च किन्तु धूमत्वादिकं तच्च तत्र सन्दिग्धमेव। ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात् पुरुषस्तु तत्र नीलधूमवत्त्वादिलक्षणैवासिकेन निरूप्यते ननु व्याप्यत्वासिद्धेरिति चेन्न तदन्यान्यद्धूमालोकस्वरूपमेव तत्र व्याप्यमिति सत्यं नत्र वस्तुगत्या व्याप्यज्ञानादनुमितिः अतिप्रसङ्गात् किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात् नच तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम्। नचैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यं प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् नचैवं न

प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम् अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा। अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं तथाहि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्त्यवच्छेदिका व्याप्यभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेन्न सकलधूमादिवृत्तिव्याप्तौ मानाभावात् यच्च वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शब्दव्याप्यत्वजातौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात्। अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत्तद्धर्म्मे भासते तत्र लाघवात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकं नैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय समप्रमाणकत्वात् फलप्रामाण्यग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात् तथा सन्निकृष्टे धूमे तदभावः समनन्तरानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात् यथा परमाणुर्निरवयवत्वे नित्यपरिमाणवत्त्वात् आकाशवदित्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः। अनुमानयोः प्रत्येकमुभयसहचाराविषयत्वेन व्याप्तिग्राहकत्वात् तथातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयं तत्रापि व्याप्तिग्राहकाभावात् न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य ज्ञानान्तरत्वम् इन्द्रियादिसन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमाकारणत्वात् सहकारिता च तदभावेऽपि भवति बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सर्वजनसिद्धत्वात् अथमन्यथा कविकाव्यादिकमिति। स्यादेतत् पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेर-

सन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात् । नच धूमत्वेन सकलधूमव्याप्यताग्रहात् धूमविशेषे संस्कारात् स्मरणोपनीतव्याप्यभेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम् एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षया वह्निमदभेदग्रहे वह्निमत्त्वसंसर्गग्रहो व्याप्तिमनुमानेन पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्त्यवच्छेदकतयेति चेन्न वह्निमान्नवेति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात् । नच विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वं गौरवात् । अथ योऽयम् विशिष्य पूर्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्ताप्रत्यभिज्ञाने न च पर्वते विशिष्य पुरा वह्निरवगतः यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत्तर्हि पक्षधर्मो धूमोऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण । नच सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत् पर्वतीयधूमे व्याप्त्यवगमो वह्नौ तु न प्रत्यक्षसामग्री सन्निकर्षाभावादिति वाच्यं हेतुसाध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात् । नच पर्वते वह्निसाक्षात्कारः न च पक्षधर्मस्य साध्यसामानाधिकरण्यविशेषो व्याप्तिः सा साध्यरूपं विनेत्युक्तम् । उच्यते विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्तयोरसंसर्गाग्रहो विशिष्टदर्शनं विशेषणविशेष्येन्द्रियसन्निकर्षो गौरयमित्यादिप्रत्यक्षे विशिष्टप्रत्यक्षकारणम् अस्ति चात्रापि व्याप्तिस्मरणं स्वतन्त्रव्याप्तेः पश्चाद्दृष्टधूमे सत्त्वम् एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशिष्टदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणं नच वह्निविशिष्टज्ञानसामग्री वह्नेरसन्निकर्षात् । कश्चित्तु धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वं गृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पश्चाद्दृष्टधूमत्वे प्रत्यभिज्ञायते तद्गृहितत्वेन पूर्वमनु-

भवात् एवञ्च धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरिति प्राहुः । भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः तथाच सर्व्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणाप्रत्यासत्त्युपादानमफलं स्यात् दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानं नहि व्याप्यतावच्छेदकतया भासमानस्यात्वञ्च व्याप्यतावच्छेदकभानाभावात् तस्मात् पक्षधर्म्मे व्याप्तिविशिष्टज्ञानं तदनन्तर विशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः । अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं तत्सामानाधिकरण्यञ्च व्याप्यत्वं तथाच लाघवात् व्यापकताज्ञानमनुमितिहेतुः साध्यस्य पक्षधर्म्मव्यापकताज्ञानञ्च परामर्शः न तु साध्यव्याप्तस्य पक्षधर्म्मताज्ञानं साध्यव्याप्यत्वपक्षधर्म्मताज्ञानं वा गौरवात् अतएव योयोधूमवान् सोऽग्निमानित्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते अन्यथा वह्निमानेव धूमवानित्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् दोषोऽपि व्यभिचारादिर्न पक्षधर्म्मव्यापकं साध्यमित्येवोन्नायः । अथ पर्व्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि तदा पर्व्वतीयधूमं प्रति व्यापकतायाः पर्व्वतधूमसामानाधिकरण्येनैवत्वात् पर्व्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत् तर्हि पर्व्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम् । यदि च भूतले व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानं वस्तुतस्तु व्यापकत्वं तद्भिन्नात्यन्ताभावाप्रतियोगित्वं न तु धूमसामानाधिकरण्यं व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति तदैवानुमितिरफला स्यात् । नचैवं परामर्शस्य चाक्षुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम् इष्टत्वात् असन्निकृष्टधूमादाविव मानस एव हि सर्व्वत्र परामर्शः चक्षुरन्वयव्यतिरेकानुविधानस्य पक्षवृत्तिधूमोपनयोपक्षीणम् । अथ अनयाज्ञाने उपसर्ज्जनतया भानस्य पक्षस्य पर्व्वतादेरनुमितौ

प्राधान्येन भानं न स्यात् नहि अलकज्ञाने उपसर्ज्जनतयावगतं अन्य-
ज्ञाने प्राधान्येन भासते तथादर्शनात् नचानुमितिस्तथात्वेनासिद्धं पर्व्व-
तोऽयं वह्निमानित्यनुमितेर्व्वाक्यसिद्धत्वादिति चेन्न पुरुषस्य दण्ड इति
ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात् अन्यथा तवापि
कथं पक्षविशेष्यकत्वनियमः नहि कारणीभूतज्ञाने यद्विशेष्यतया
भासते तत्कार्य्यीभूतेऽपि तथा द्रव्यभूतले घटोनास्तीतिज्ञानजन्ये घटा-
भाववद्भूतलमितिज्ञाने तत्र च व्यभिचारात् तस्मात् पक्षधर्म्मलिङ्ग-
परामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति सा
तथाभूतामेवं ममापि तुल्यमिति ।

एवं लिङ्गपरामर्शः कारणं ननु परामृश्यमानं लिङ्गम् । अथ
परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः तथाच लिङ्गमपि हेतुः
विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्व-
ग्रहात् नच लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धं परिचये विशे-
षणान्तराभावेन लिङ्गमेव विशेषणं तथाचानन्यथासिद्धत्वात् तदपि
हेतुः अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं
न स्यात् अपि च धूमवान् वह्निमानिति धूमसमानकालवह्निविषया
धूमविशेषणिकानुमितिः ज्ञायमानविशेषणजन्या विशेषणसमान-
कालतया विशेष्यविषयेऽप्यव्यवहितविशिष्टज्ञानत्वात् दण्डी पुरुष इति
प्रत्ययवत् अतएव ज्ञायमानविशेषणजन्यत्वेन विशेषणाकारावच्छिन्नतया
विशेष्यभाननैयत्यं यथा दण्डी पुरुष इति प्रत्यक्षे तेन धूमसमानकाली-
नवह्निसिद्धिः अन्यथा तत्तद्धूमकालावच्छिन्नवह्न्यनुमानं न स्यात् समय-
विशेषणमन्तर्भाव्य व्याप्त्यग्रहात् । किञ्च लिङ्गकारणत्वपक्षे परामर्श एव
तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वादिति
न तत् कारणम् ।

अत्रोच्यते ।

अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः व्यापार-

पूर्व्वं विशेषाभावात् नच विद्यमानं लिङ्गान्तरमेव तद्धेतुः तदा तस्यापरामर्शात् परामर्शाविषयस्य कारणताग्राहकाभावात् भाविनि पक्षे पक्षेऽपरस्मिन्नेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च यदि च वर्त्तमानमेव तत्र लिङ्गं तदा वर्त्तमानवह्न्यनुमानोपपत्तिः अथ भावि भूतं वा धूमादि न लिङ्गं किन्तु तत्प्रागभावध्वंसौ तच्च वर्त्तमानमेव तयोरपि वह्निसमानदेशत्वनियमादिति चेन्न अतीतभाविदिनवृत्तितया निश्चितात् वर्त्तमानतया सन्दिग्धात् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गं तयोः सन्दिग्धत्वात् नापि धूमत्वस्यावर्त्तमानत्वात् किञ्च भूतभाविवर्त्तमानत्वाविषयात् पर्व्वते धूम इति ज्ञानाद्यत्रानुमानं तत्र का गतिः सर्व्वत्र प्रागभावाद्यन्यतमत्वं धूमाद्यत्यन्ताभावाभावत्वं वा लिङ्गमिति चेत् न व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् अन्यतमत्वाद्यज्ञानेऽपि धूमज्ञानादनुमितिदर्शनाच्च । अपि च न धूमप्रागभावादि लिङ्गं न वा तद्धीरनुमितिकारणं प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमज्ञानादेवानुमितिसम्भवाच्च । किञ्च लिङ्गं नानुमितिमात्रे हेतुः लिङ्गं विनापि धूलीपटलात् लिङ्गभ्रमेणानुमित्युत्पत्तेः नापि लिङ्गं प्रमानुमितौ परामर्शानुमितिमात्रे हेतुः तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात् यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात् । अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वं तथाज्ञायते लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेन्न भाविना भूतेन वा यदाकदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवादनुमितिपूर्व्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा धूमकालीनवह्न्यनुमानञ्च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव । अथवा धूमकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्म्मसमानाधिकरणञ्च पक्षधर्म्मत्वात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः । यत्तु व्यापाराभावान्न परामर्शः कारणमिति तथैव किन्तु व्याप्तिज्ञानं कारणं परामर्शो व्यापारः । ननु परामर्शस्य संस्कारो

व्यापारः परामर्शस्य च चरमकारणत्वेन संस्कारोत्पादकक्षणेऽनुमित्युत्पादनात् नापि तर्कः व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति ।

तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि तथाहि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् । अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाभिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेन्न व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि व्यावृत्तत्वे यतश्च व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात् एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि नचात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च नानेति वाच्यम् अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात् अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात् नाप्याश्रयनाशजन्यगुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यं यत्र हि प्रतियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते तथाच नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्ततां तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात् । नाप्याकाशात्यन्ताभावः केवलान्वयी तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् अभावात्यन्ताभावस्य भावत्वात् । अथ भावात्यन्ताभावो न प्रतियोगिरूपस्तथात्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति

प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेन्न अत्यन्ताभावात्य-
न्ताभावः प्रतियोग्येव अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिर-
साधारणो धर्म्मइति । उच्यते वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवला-
न्वयित्वं आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रति
योगी तथापि स न वृत्तिमानित्याकाशात्यन्ताभाव एव केवलान्वयी
तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि वृत्तिमतोऽत्यन्ताभावस्याप्रति
योगित्वात् । ननु प्रमेयत्वं प्रमाविषयत्वं तच्च न केवलान्वयि प्रमाया
विषयत्वस्य चाननुगमादिति वाच्यं प्रमात्वमेव हि परम्परासम्बन्धात्
घटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा तथापि केवलान्व-
यिनि संशयाभावात् कथमनुमितिः प्रमेयत्वमत्र वर्त्तते न वेति संशयश्च
न प्रमेयपक्षकः किन्तु प्रमेयत्वपक्षको भिन्नविषयकः प्रमेयत्वपक्षके
चास्तित्वसाध्यस्याव्यतिरेकित्वं तथाच घटः प्रमेयो न वेति
संशयो मृग्यते स च नास्त्येव । अथ पक्षः साध्यवान्न वा पक्षे साध्य
मस्ति न वेति संशयौ समानविषयकावेव तदस्यास्त्यस्मिन्निति मतुपो-
विधानादिति चेन्न विशेषणविशेष्यभावभेदेनार्थभेदात् नैवं य एव
हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात्
लाघवाच्च नतु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् प्रमेयत्वं
घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्य
सिद्धिविरोधी भवत्येव यदा संशययोग्यतैवानुमानाङ्गं संशयस्य
तदानीं विनाशात् न च तत्रापि साधकबाधकप्रमाणाभावः प्रमेयत्वा
भावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरितिवाच्यं पक्षनिष्ठात्यन्ता
भावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात्
प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये । नन्वेकरूप
विकलमिदं कथं गमकं तद्वदेव वा व्यतिरेकिविकलवत् रूपान्तरविकल
मपि गमकं स्यादिति चेन्न अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानु-
मित्यनुभवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि

प्रयोजकत्वे व्यतिरेकोपासना व्यतिरेकस्य विपक्षवृत्तित्वशङ्कानिवृत्ति-
द्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन प्रागेव नोदेति।

केवलव्यतिरेकी त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्ति-
ग्रहः। ननु व्यतिरेकी नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारण-
त्वात् अत्र व्यतिरेकसहचारात् तत्र व्याप्तिरन्वयस्य पक्षधर्मता नच
व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वरूपमुभयमप्यनु-
मितिप्रयोजकमिति वाच्यम् अननुगमात् नचान्यतरत्वं तथा एकप्रमाणा-
परिशेषापत्तेः नच तथाप्याननुगमन्यायेनानुमितिविशेषे तद्धेतुत्वमिति
वाच्यं व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः उभयसिद्धस्य तत्कारणस्या-
भावात् नच साध्याभावव्यापकाभावप्रतियोगित्वस्यैवानुमितिप्रयोजक-
मिति वाच्यं गौरवात् केवलान्वयिन्यभावाच्च। अथ साध्याभाव-
व्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम् एवं व्यतिरेकव्याप्त्या-
न्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते तन्न अन्वय-
व्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः अन्वयव्याप्त्यनु-
कूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्त-
कालत्वमिति। उच्यते निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव
गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् अन्वयव्यतिरेकवत्।
नन्वेवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितं नियतसामानाधि-
करण्यरूपत्वाद्व्याप्तेरिति सत्यं गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात्
अतएवाचार्य्यैः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने पृथिवीत्वमितरभेद-
व्याप्यमिति प्रतीतावपि सर्वा पृथिवीतरभिन्नेति पृथिवीविशेष्यकबुद्धे-
र्व्यतिरेकिसाध्यत्वाच्च। यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः
साध्याभावव्यापकसाधनाभावाभावेन साधनेन साध्याभावाभावस्य सा-
ध्यस्य साधनात् व्यापकाभावेन व्याप्याभावस्यावश्यम्भावात्। अथैवं
न सानुमितिः अप्रहेतुलिङ्गपरामर्शाभावादन्यथाननुगम इति चेन्न
अनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वात् नचैवमतिप्रसङ्गः अनु-

मितिसामान्यसामग्र्यां सत्यामप्यनुमितिविशेषसामग्रीविरहादनुमित्य-
नुत्पत्तेः विशेषसामग्रीसापेक्षायाएव सामान्यसामग्र्या जनकत्वात्
अन्वयिव्यतिरेकिविशेषद्वयसामग्री च नास्त्येव । ननु पृथिवी इत-
रेभ्यो भिद्यते पृथिवीत्वादितिव्यतिरेकिणि साध्यमसिद्धं तथाच न
व्यतिरेकिनिरूपणं न वा पक्षत्वं न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं
तेषां साध्यज्ञानजन्यत्वात् । अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं
तत्र हेतोरवगमेऽन्वयित्वं अनवगमे असाधारण्यम् । किञ्च इतरभेदो
न साध्यं अधिकरणप्रतियोगिनोः पृथिवीजलाद्योरनुमानात् प्रागेव
सिद्धेः नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगिमत्त्वं तद्धि
पृथिवीत्वादिकं तच्च सिद्धमेव नच जलादिनिष्ठात्यन्ताभावप्रतियोगि-
त्वेन पृथिवीत्वं न सिद्धमिति वाच्यं जलादौ पृथिवीत्वात्यन्ताभावग्रहद-
शायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात् अन्योन्याभावस्तु भेदो यद्यपि
साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वादन्योन्याभावग्रहस्य तथापि ज-
लादिप्रतियोगिकान्योन्याभावस्याप्रसिद्धिः नच जलादिप्रत्येकान्योन्या-
भावः साध्योऽसाधारण्यप्रसङ्गात् । अथ पृथिवी तेजोभिन्ना न वेति
संशयेन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादित्रयोदश-
भिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादित्रयोदशभिन्नत्वं प्रसिद्धं
तदेव साध्यम् एकविशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशि-
ष्ट्यज्ञानात् एवञ्च संशयप्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम् ।
यद्वा पृथिवी इतरभिन्ना नवेति प्रत्येकं त्रयोदशसंशयविषयाणां
त्रयोदशान्योन्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेकादिनिरू-
पकः नचैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यतिरेकिवैयर्थ्यं साध्यनिश्चयार्थं
व्यतिरेकिप्रवृत्तेः * नचासाधारण्यं समुदितान्योन्याभावानां साध्यत्वे
सपक्षाभावादिति चेन्न साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयो भवत्येव
साध्यसन्देहे तद्व्यतिरेकसंशयस्य पक्षलेपत्वात् तथाच संशयरूपासाध्य-
सिद्धिरिति मिश्रमतम् एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रति-

प्रसिद्धपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्व्वार्थप्रतिपादकत्वात् साध्यप्रसि
द्धिरिति परास्तम् वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात् ।
नच तद्धेतौ वादिवाक्यजन्यत्वेनाप्रामाण्यसंशयात् निश्चयेपि संशयइति
तन्निश्चयार्थं व्यतिरेकीति वाच्यं तर्हि संशयप्रसिद्धं साध्यं तस्य च न
व्यतिरेकानिश्चायकत्वमित्युक्तत्वात् स्वार्थानुमाने तदभावाच्च ।

उच्यते घटादावेवेतरसकलभेदस्य प्रत्यक्षः प्रसिद्धिः घटो न
जलादिरितिप्रतीतेः । नन्वयमन्योन्याभावो न प्रत्यक्षः अतीन्द्रियप्रति
योगिकाभावत्वात् परमाणुसंसर्गाभाववत् योग्यानुपलब्धेरभावग्राहक
त्वात् नचयोग्यत्वमात्रानन्तरं स्तम्भः पिशाचो न भवतीतिप्रतीतेर्बाधक
बलेन वायुर्व्यातीतिवत्किञ्चिद्ग्राह्यप्रतीयत्वादिति चेन्न योग्यानुपलम्भो-
ऽधिकरणे प्रतियोगिसत्त्वविरोधी सोऽभावं ग्राहयति नतु योग्या-
नुपलब्धिमात्रम् अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथि
वीत्वाभावग्रहप्रसङ्गात् अधिकरणे प्रतियोगिसत्त्वस्य तर्कितं यदि हि
स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येतेति पिशाचानुपलम्भः स्यात्
नच पृथिवीजलाद्भिद्यते जलादिधर्म्मवत्त्वात् तेजोवत् एवमन्येभ्योपि
भेदसिद्धौ द्वादशभिन्नेतिविशिष्टदत्वा समवायभेदसाधनादन्वयिन एव
पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यं जलादि
भिन्ना सती समवायभिन्नेति बुद्धावपि त्रयोदशभिन्नेतिबुद्धेर्व्यतिरेकि
साध्यत्वात् नच घटस्यापि पक्षत्वादंशतः सिद्धसाधनं सर्व्वा पृथिवी-
तरभिन्नेत्युद्देश्यप्रतीतेरभावात् पक्षतावच्छेदकनानात्वे हि तत् यथा
नित्ये वाङ्मनसे इत्यत्रानित्या वागितिबुद्धेरुद्देश्यायाः सिद्धत्वादंशतः
सिद्धसाधनम् अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात्
नच घटः कथं पक्षः साध्यनिश्चयेन संशयसिषाधयिषयोरभावादिति
वाच्यं सर्व्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषा-
धयिषयोश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेषदर्शनं सिद्धिर्वा
घटत्वेन संशयसिषाधयिषे न स्तः पृथिवीत्वेन ते भवतः एवं धूम-

दात् वह्निमानिति धूमत्वेन वह्निनिश्चयेऽपि पर्व्वते वह्निसंशयवत् यद्वा सर्व्वत्वेन रूपेण न पक्षता सर्व्वत्राविप्रतिपत्तेः घटाद्येकदेशे इतर भेदस्य प्रत्यक्षसिद्धत्वात् तथा चैकदेशे विप्रतिपत्तौ सामान्ये इतरभेद साधने अर्थान्तरं किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्ति विषयत्वात्तावतामेव पक्षता विशेष्याननुगमात्। तर्हि पृथिवी इतर भिन्ना पृथिवीत्वाद् घटवदित्यन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यति-रेकिणा घटसाधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वा विरोधात् पक्षान्यत्वं हि न तन्त्रं किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकं तच्च पृथिवीत्वाग्रहे पूर्व्वं गृहीतं यत्र साध्यं पश्चात् स्मर्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेकव्यवहार इति वाच्यं हेतो रेव पक्षतावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामा-नाधिकरण्यग्रहावश्यम्भावादिति चेत् सत्यं अन्वयितुल्यतया व्यति-रेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेकोपन्यासस्यापि पर्य्यनुयोज्यत्वात् तदुक्तमाचार्य्यैः तावदयं सुहृदुपदेशः केवलव्यतिरेकि लक्षणं तावन्निर्व्यूढम्। अथवा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते अतएवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्या भावाः साध्या इति नान्वयित्वासाधारण्ये। यद्वा जलं तेजःप्र-भृति द्वादशभिन्नप्रतियोगिकान्योन्याभाववत् द्रव्यत्वात्तेजोवदित्यनु-मानात् त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्न-त्वं साध्यं न चान्वयित्वमसाधारण्यं वा पक्षादन्यत्र साध्याप्रसिद्धेः वस्तुगत्या पृथिव्यामेव साध्यसिद्धिः एवं व्यतिरेकिणेति चेन्न पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणा विना अप्रतीतेः। नन्वेवं पृथिवी जलादि त्रयोदशभिन्नप्रतियोगिकान्योन्याभाववती द्रव्यत्वादिति पृथिवीभिन्न वह्न्यादिसिद्धिः स्यादिति चेन्न अप्रयोजकत्वात् प्रकृते चानुभूयमान जलादिवैधर्म्यस्य पृथिवीत्वाश्रयत्वव्याप्यत्वादेरतिरिक्तं विनानुप-

पक्षे । नन्वितरभेदो यद्यन्योन्याभावस्तदा भावाद्भेदो न सिध्येत अभावस्याभावान्तराभावात् यदि च तेन समं स्वरूपभेद एव साध्यः तदाननुगमादनुमानाप्रवृत्तिः भावोऽभावो न भवतीत्यबाधितप्रतीति बलादभावस्यापि अन्योन्याभावोऽस्तीति केचित् तन्न अपसिद्धान्तात् अनतिप्रसक्ताधिकरणस्वरूपस्यैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्च इति चेन्न इतरभावान्योन्याभावस्य साध्यत्वात् नचैव मभावादविवेकतादवस्थ्यं तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा साध्यत्वात् । अन्ये तु पृथिवीत्वभिन्नधर्म्मात्यन्ताभाव एव साध्यः जलत्वादिप्रतियोगिका यावन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्त-द्धर्म्मात्यन्ताभावयोगो वा एते चाभावा जलत्वं न घटादौ घटादिजला त्यन्ताभाववदिति प्रत्यक्षादेः क्वचित्तत्तद्धर्म्मिण्येव प्रसिद्धा इति वा प्रसिद्धिः तावतामभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत् किमेतावता नहि तावद्वैशिष्ट्यमत्र साध्यते किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्तेच तत्र तत्र प्रसिद्धा एव तावद्वैशिष्ट्यधीस्तु फलम् अन्यथा सिद्धसाधनात् मिलितानामपि साध्यत्वेनाप्रसिद्धिः किञ्चिदेकधर्म्माव च्छेदेनहि बलादिवन्मेलनार्थः सच नासिद्धः नच हेतोरसाधारण्यं तावदभावयोगीत्यत्र सपक्षो भवति नतु तदेकदेशकविपक्षाभाववान् साध्यतायास्तावत्पर्य्याप्तेः । यद्वा जलत्वात्यन्ताभावतेजस्त्वात्यन्ता-भावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटात्यन्ताभाववत् एवमत्यन्ता भावान्तरसामानाधिकरण्यमपि साध्यमिति नाप्रसिद्धिः । किञ्चेतरे तावत् प्रसिद्धा एव तेच भेदप्रतियोगिनो मेयत्वादितीतरभेदोऽपि प्रसिद्ध एव । ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति चेन्न इतर भेदनिषेधो हीतराभेदः नच तेजःप्रभृत्यभेदोऽत्र इति दृष्टान्तस्य साध्यवैकल्यात् चतुर्द्दशाभेदानां चैकत्र विरोधेनासम्भवात् चतुर्द्दश भेदानां चैकत्र वृत्तौ न विरोधः । यत्तु साध्यप्रसिद्धौ पृथिवीतर भिन्ना तत्साध्याधिकरणापृथिव्यन्यतरत्वात् तदधिकरणवत् पृथिव्यां तत्

साध्यमन्वयिन एव सेत्स्यतीति तन्न अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात् लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात् एवं तर्हि पृथिवी जलं पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत् न अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव ।

ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्य्यवत्त्वादिति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणं नैरात्म्यस्य घटस्य न प्रत्यक्षवेद्यं तस्य तत्रासामर्थ्यात् नानुमानगम्यं नैरात्म्याप्रतीतावन्वयिनोऽभावात् सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तेः । अथेच्छा समवायिकारणजन्या कार्य्यत्वात् तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत् यदि सात्मकत्वमात्मसंयोगवत्त्वं तदा घटादौ तदस्तीति ततो हेतुव्यावृत्त्या साधारण्यं ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं सात्मकत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात् आत्ममनसोस्तथात्वेऽप्यकार्य्यत्वादिति चेत् न शरीरादन्यत्रासिद्धेः तत्र प्रसिद्धौ सिद्धसाधनात् इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद्व्यतिरेकः शरीरे साध्यत इति चेन्न इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात् अन्यथा असिद्धिव्यतिरेकाद्यनिरूपणात् अप्रसिद्धसाध्यसंसर्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत् न व्यतिरेकाद्यनिरूपणात् असाधारणधर्म्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि खेच्छाकल्पितहित्वाद्यनुमानप्रसङ्ग इति । उच्यते इच्छाया असमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत् स चासमवायिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात् आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छाऽसमवायिकारणसंयोगाव-

च्छेदकत्वं सात्मकत्वं शरीरे साध्यते। यद्वा आत्मनीच्छाधारता आत्म संयोगावच्छेद्या अन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगावच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम् अतएव ज्ञानसमानाधिकरण ज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं वा सात्मकत्वं स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानमिच्छादिविरहात् इच्छादिप्रयोजकेच्छाधाराधारताघटकेच्छाद्यसमवायिकारणसंयोग विरहानुमानं कार्य्याभाववति कारणाभावनियमात्। नच सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदित्यन्वयिनैव साध्य सिद्धेः किं व्यतिरेकिणेति वाच्यं शरीरं सात्मकमितिशरीरविशेष्यकानुमितेर्व्यतिरेकिणं विनानुपपत्तेः उपायान्तरस्योपायान्तरादूषकत्वाच्च यद्वा चेष्टा संयोगासमवायिकारणिका संस्कारान्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोगएव पर्य्यवस्यति प्रयत्नान्वयव्यतिरेकानुविधायित्वात् एवं चेष्टाया असमवायि कारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादितिहेतुः चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः चेष्टा विरहाच्चासमवायिकारणसंयोगविरहोपि सुग्रहः। यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सत्यात्मविशेषगुणकारणभोगानधिकरणवृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं तन्नैवं यथा घटः आत्मप्राणसंयोगः प्राणमनः संयोगो वा शरीर प्राणसंयोगेनैवान्यथासिद्धो न कारणं भोगाधारत्वञ्च भोगसमवायि कारणातिरिक्तवृत्तिसकलभोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवदिति तार्किकनीतिः। अथेच्छादिकं द्रव्यातिरिक्तद्रव्याश्रितं अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथा नाश्रितमष्टद्रव्याश्रितं वेति

कथं व्यतिरेकी अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात् । स्यादेतत् इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादेः अष्टानामेतदाश्रयत्वे विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्म्मदर्शनाद्वा तद्व्यतिरिक्तं न वेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । यद्वा इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । अथ वा द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्नवेति पूर्ववत् संशयादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धमिच्छायाः साध्यते संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य कारणत्वात् नचैवं संशयादेव पक्षे साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यं निश्चयार्थं तत्प्रवृत्तेरिति नैवं संशयेन साध्यप्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात् साध्यव्यतिरेकव्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशयावश्यम्भावात् । किञ्च संशयोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात् साध्यनिश्चयं विना योग्यानुपलम्भासम्भवात् नापि व्यापकाभावात् साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात् नच यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादष्टाश्रिता सती द्रव्याश्रिता न स्यात् रूपवदिति साध्यविपर्य्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्य्यं करोति अतएवैतादृशसंशयोपस्थितकल्पितडित्थादिसाधनमप्यपास्तं तद्विपर्य्यये प्रतिकूलतर्काभावादिति वाच्यं साध्यनिश्चयं विना साध्यव्यतिरेकनिश्चयतन्मूलतर्कानवतारात् अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कोदय अर्कादके च तत् सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति । उच्यते । इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारता भवेत् अत्र पृथिव्याद्यष्टद्रव्यभिन्नम् अष्टद्रव्यावृत्तिधर्म्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वादित्यष्टद्रव्यातिरिक्तद्रव्यसिद्धौ विच्छायामष्टद्रव्यातिरिक्तद्रव्यवत्त्वमष्टद्रव्यातिरिक्तं द्रव्यवृत्तित्वं वा

साध्यते साध्यप्रसिद्धिर्नवत्वे इच्छाविशेषोऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्व प्रतीतेर्व्यतिरेकिसाध्यत्वात् तथापीच्छाऽष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्ट द्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्धेरेव दृष्टान्तप्रसिद्धेरन्वय्येव हेतुः स्यादिति चेन्न अन्वयथात्र प्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकित्वसम्भवात् न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यं तद्धि साध्यतदभाववद् साधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहं प्रकृते न च हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात् साध्यसाधकत्वे तत्सत्त्वाच्च अतएव यावदेकस्यानुकूलतर्को नावतरति तदैव दशाविशेषेऽसाधारण्यं दोष इत्युक्तं सुवर्णं तैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वादि-त्यादावपि तथा । अथाष्टद्रव्याधारत्वबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिद्ध्यति पक्षधर्म्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात् अत-एवासर्व्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्य्यत्वेन ज्ञानजन्य-त्वं सिद्ध्यन् नित्यसर्व्वविषयत्वं ज्ञानस्यादायैव सिद्ध्यतीति चेन्न बाधानन्तरमष्टद्रव्यातिरिक्तद्रव्यविषयाप्यनुमिति अंद्रव्याश्रितत्वप्रकारिका स्यात् अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात् नत्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका तस्य पूर्व्वमप्रतीतत्वेन प्रकारत्वासम्भवादिति तत्प्रकारिकानुमितिर्व्यतिरेकिण्येव अनाद्यनन्तद्व्यणुकादियावत्पक्षीकारणेऽनाद्यनन्ततावदुपादानगोचरापरोक्षज्ञानत्वमेव नित्यसर्व्ववि-षयकत्वमेतदन्यनित्यसर्व्वविषयत्वं व्यतिरेकिण्येव सिद्ध्यति पक्षधर्म्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यसिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका अतिप्रसङ्गात् । नन्वष्टद्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते तदाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थएव नोपपद्यते सत्यम् एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिद्ध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिद्ध्येत् अथ सामान्यव्यभि

कारणमादाय मानान्तरेणोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तित्वेनेच्छादेः परिच्छिद्यते ज्ञानान्तरेणोपस्थितविशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ दर्शनादिति चेत् न मानान्तरान्नियमेनानुपस्थितेः ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः । अथ व्यतिरेकी नानुमानं सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेन्न विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात् । अन्ये तु व्यतिरेकिण्यभाव एव साध्यः स चाप्रसिद्धस्य सिध्यति यस्याभावस्य व्यापको हेत्वभावो गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिध्यति व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात् तथाहि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र इतरस्य जलादेर्व्यापका पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितरान्योन्याभावोऽप्रसिद्धस्य सिध्यति प्रतियोगिज्ञानस्य च हेतुत्वात् प्रत्यक्षेण भूतले घटाभाववत् एवमन्यत्राप्युक्तरीत्येच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपलम्भात् जीवच्छरीरन्तु न तथा तदवच्छेदेन तदाश्रये इच्छोपलम्भात् तथाचेच्छात्यन्ताभावाश्रयतावच्छेदकतद्रूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधिकरणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थप्रवृत्तिजनकत्वाभावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थप्रवृत्तिजनकत्वेन व्यधिकरणप्रकारावच्छिन्नत्वस्याभावः सिध्यति व्यधिकरणप्रकारानवच्छिन्नत्वमेव प्रमात्वम् । ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वाद्विशिष्टज्ञानस्येति चेन्न पक्षे साध्यानुमितिसामग्रीसत्त्वात्पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यक

प्रत्ययवत् तथापि साध्याभावव्यापकाभावाभावरूपहेतुसत्तया पक्ष
ज्ञानं व्यतिरेकिणि गमकतौपयिकं नच साध्यप्रसिद्धिं विनैतादृशप्रति
सन्धानं सम्भवति नच वस्तुगत्या यः साध्याभावव्यापकाभावप्रति
योगिमत्तया ज्ञानं उपयुज्यतइति वाच्यं व्यतिरेक्यभावानुपपत्तेरिति
चेत् न योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन
तस्य व्याप्यस्याभावः पक्षे साध्यतइत्यनुगतानतिप्रसक्तस्य गमकतौप-
यिकत्वात् अयञ्च व्यतिरेकिप्रकारः स्वार्थएव परं प्रति साध्याप्रसिद्ध्या
प्रतिज्ञाद्यसम्भवादिति सर्व्वं समञ्जसम् ।

व्यतिरेक्यनुमानसिद्धावर्थापत्ति र्न मानान्तरं तेनैव तदर्थसिद्धेः
स्यादेतत् ज्योतिः शास्त्रात्तत्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्व
मवगतं चरमं शतवर्षजीवी गृहएवेति नियमे प्रत्यक्षेणावगते पश्चा-
द्योग्यानुपलब्ध्या निश्चितो गृहाभावो जीवननियमग्राहकप्रमाणयो
र्बलाबलानिरूपणाद्बहिःसत्त्वकल्पनं विना नियमद्वयविषयसंशयं जन
यित्वा जीवति न वेति संशयमाधाय जीवनसंशयानुपपत्त्या जीवनोप-
पादकं बहिःसत्त्वं कल्पयतीति यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्र-
तीते तथान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभावः तदुत्पादितनियम
द्वयविषयकसंशयो वा कारणं जीवनसंशयस्तदाकारणो सव्यापारकत्वा
नियमात् प्रमाणयोर्व्विरोधज्ञानं तदाहितसंशयद्वारा कारणमिति
कश्चित् । तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भ
वादर्थापत्तिर्म्मानान्तरम् । ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंश
यादपि तदेककोटिनिर्व्वाहकल्पनापत्तिः नच प्रमितसंशयः कल्पनाङ्गं
जीवनस्य तदानीं प्रमितत्वे संशयाभावप्रसङ्गात् जीवित्वनिश्चयेऽनु-
मानादेव बहिःसत्त्वनिश्चयाच्च कदाचित् प्रमितत्वे च प्राक्प्रमित
पुरुषत्वस्यान्तरा तत्संशये कल्पना स्यात् किञ्च जीवनसंशयस्य स्थले
ऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकमिति चेत् न यथोक्त
सामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात् अतएव स्थलजनिश्चयमात्रया

र्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न वहिःसत्वकल्पक गृहाभावो योग्यानुपलब्धिनिश्चितो न संशय इति। अथ जीवन नियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमवगतं वा तर्हि वहिः सत्व कल्पना विशेषदर्शनविरहात् कल्पने वा प्रमितजीवननिर्व्वाहकवहिः सत्ववद्गृहनियमनिर्व्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात् जीवनमरणयोः संशयाविशेषात् अथ तयोरैक्यं बलीयोऽपरमवश्यं तदेकेनापरस्य बाधएवेति न संशयः तस्मादत्र शतवर्षजीवित्वमवधा- रितं गृहाभावश्च निश्चितः तत्र वहिःसत्वकल्पनं नतु जीवनसंशये एवञ्च देवदत्तो वहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रति योगित्वादिति व्यतिरेकिणा वहिःसत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषया जीवित्वसंशये वहिःसत्त्वकल्पना च नास्त्येव किन्तु गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य वहिःसत्त्वं कल्प- यतीति न युक्तं नहि यतएव यत्संशयः सएव तन्निश्चयाय प्रभवति अति प्रसङ्गात्। मैवम्। यथोक्तसामग्रीजनितसंशयवानेवं तर्कयति योग्या- नुपलब्धिगृहीतो गृहाभावइति तन्निश्चयः सुदृढइति जीवननियम ग्राहकयोरैक्यं बाध्यं विरुद्धयोरप्रमाणत्वात् तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नोवा वहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकं तत्र वहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृहएवेति नियमद्वयस्यापि बाधा स्यात् तदाह जीवनबाधे तन्निमित्तबाधस्यावश्यकत्वादिति। किञ्च अद्य जीवति श्वो जीविष्यतीत्यादिबहुतरप्रमाणबसुहृत्पांदिसनयोयाधिनियतं जीवनमुपलब्धमितितद्बाधे बहुतरव्याप्तिबाधः देवदत्ततदवयवगृहसत्त्व व्याप्तिस्त्वल्पा तथाभावरूपमरणापेक्षया वहिः सत्त्वस्य भावस्य लघु- त्वं यदि च गृहान्योन्याभावाश्रयवहिःपदार्थवृत्तिसंयोगाश्रयत्वं वहिः सत्त्वमिति तदपेक्षया मरणमेव लघु तथापि मरणापेक्षया जीवनमात्रं लघुरिति तदेव कल्पयितुमर्हं। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्या-

नुमानादपि बहिःसत्त्वज्ञानं भविष्यतीत्यतोऽव्यावर्त्तकसहकृतो यथोक्त
सामग्रीप्रभवः संशयो बहिःसत्त्वं कल्पयति । न च बाध्यं तर्काणां विप-
र्य्ययापर्य्यवसायित्वं आभासत्वं तत्पर्य्यवसाने तदेवानुमानमेतत्तर्कसहायं
बहिःसत्त्वमनुमापयिष्यतीति यतो लाघवगौरवतर्काणां विपर्य्ययापर्य्यव
सायित्वमेव प्रमाणसहकारित्वमतएव प्रत्यक्षशब्दादावपि सहकारी
सः न च तस्यां दशायामेव प्रमाणान्तरमस्ति ततोऽर्थापत्तिसहकारित्वं
तर्कस्य । ननु स्वकारणाधीनस्वभावविशेषात्तर्कानुगृहीतयथोक्तसंश-
यस्य यदि बहिःसत्त्वप्रमापकत्वं तदा मृते गृहस्थिते वा तादृशसंशया
दत्र बहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेन्न यथाहि प्रमापक-
स्येन्द्रियस्य दोषेण प्रमाशक्तितिरोधानादैन्द्रियकभ्रमः तथा यथोक्त
संशयस्यापि दोषेण प्रमाशक्तितिरोधानादयथार्थरूपभ्रमसम्भवात् परो-
क्षज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्वनियम इति चेत् सत्यं प्रकृ-
तेपि जीवनगृहाभावनियमग्राहकप्रमाणयोरन्यतराभासत्वेन भ्रमस्य
सम्भवात् यदा दोषाभावसहकृतस्य यथोक्तसंशयस्य बहिःसत्त्वप्रमा-
पकत्वमिति । उच्यते । अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वादिति सा-
मान्यतोदृष्टादेव तर्कसहकृताद्गृहनियमग्राहकबाधे लिङ्गविशेषेण
जीवित्वनिश्चयेऽनुमानाद्बहिःसत्त्वसिद्धिः तथाहि जीवनप्रमाणबाधे
गृहनियमप्रमाणोत्थापितलिङ्गेन मरणानुमानात् प्रमाणत्वाभिम-
तयोर्द्वयोरपि बाधा स्यात् गृहनियमग्राहकबाधे च निष्प्रतिपक्षजी-
वनप्रमाणलिङ्गविशेषेण जीवित्वनिश्चये बहिःसत्त्वानुमानादेकप्रमाण
बाधा वेत्यादि तर्कसहकृतात् सामान्यतोदृष्टादेवानयोरेकं बाध्यमिति
ज्ञायमानानुमितिः प्रमाणमरणज्ञापकं विषयीकरोति ननु बहिः
सत्त्वपरकारणसाधकं जीवनप्रमाणं तथाच सामान्यतोदृष्टादेव गृह
नियमग्राहकबाधे जीवनप्रमाणलिङ्गविशेषेण जीवित्वनिश्चयेऽनुमाना
देव बहिःसत्त्वज्ञानमिति किमर्थापत्त्या । ननु बहिःसत्त्वज्ञानं विना
जीवीगृहस्थेत्यस्य अन्वयस्यापि व्याप्तिग्रहस्याशक्यत्वात् प्रथमं बहिःसत्त्व

ज्ञानं नतु गृहनियमग्राहकाबाधानन्तरं तत् येन निष्पादितस्थिरजीवन ग्राहकाज्जीवित्वनिश्चयेऽनुमानं स्यात् न प्राथमिकवहिःसत्वज्ञानमर्था पत्तिं विना नच गृहनियमग्राहकेऽपि तुल्यबले जागरूके कथमर्थाप- त्त्यापि वहिःसत्वज्ञानमिति वाच्यं तर्कसहकारेणार्थापत्तेर्बलवत्त्वा- द्वहिःसत्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेन्न तर्कसह कारिणः सामान्यतोदृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात् तस्मात् यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव वहिःसत्वज्ञानमित्यविवादे तत्र कल्पनीयप्रमाणाभावे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात् किन्तु नियमग्राहक बाधद्वारा वहिःसत्वपरस्परासाधके सामान्यतोदृष्टे लाघवात् नच सामान्यतोदृष्टावतारएवात्र नास्तीति वाच्यम् अनिर्द्धारितैकबाधप्राप्तौ ह्येकबाधानुकूलकल्पनायां विनिगमकाभावे नचैकबाधप्राप्तिः सामा- न्यतोदृष्टं विना । किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रामाण्यसंशयो न स्यात् न स्याच्च जीवनसंशयः द्वयो रपि जीवनमरणनिश्चायकत्वात् । अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्य्यवसितत्वात्तज्जनितनियमद्वयसंशया हितजीवनसंशयानन्तरं तर्कावतारे वहिरस्तीतिज्ञानं जायमानं संश- यस्य कारणत्वं व्यवस्थापयतीति चेन्न यदेव हि विरुद्धार्थग्राहकत्वं तर्कं विना ज्ञातमनिर्द्धारितैकाप्रामाण्यानुमितिमजीजनत्तदेव तर्कसहकृतं पुन- रनुसन्धीयमानं गृहनियमग्राहकप्रमाणमित्यनुमितिं वहिःसत्वज्ञाना- नुकूलां जनयति सहकारिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात् नच जीवनसंशयानन्तरं तदनुसन्धानमसिद्धं गृहनियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहकत्वानुसन्धानं विना वहिःसत्वकल्पनेऽप्य- बाधप्रसङ्गात् । अथ यदि पर्य्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकं तदेच्छा द्रव्याश्रिता कार्य्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादष्टद्रव्यवृत्तित्वबाधे व्यति-

रेकिण्यात्मसिद्धिरिति भज्येत अष्टद्रव्यवृत्तित्वबाधसहकृतात् सामा-
न्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेन्न अनुमितेर्व्याप्य-
कतावच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात्
व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च । अपि
च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वान्मद्वदिति सामा-
न्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति तथा
च लिङ्गविशेषानिश्चयादनुमानादेव बहिःसत्त्वसिद्धिः । अथ लाघव
साचिव्यात् सामान्यतो दृष्टस्यापि विशेषविषयत्वात् नियमग्राहकप्र-
माणोपस्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्येवास्यापि सत्प्रति
पक्षत्वम् एकेनापि भूयसामपि प्रतिबन्धकसम्भवात् न च तर्कात् सामा-
न्यतोदृष्टस्य बलवत्त्वं व्याप्तिपक्षधर्मते हि बलं तच्च तुल्यमेव लाघवं
लाघवाख्यतर्कस्य विशेषमात्रपर्य्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्य
त्वादिति चेत् तर्हि पक्षतावच्छेदकविशेषसिद्धिः क्वापि न स्यात् सर्व्वत्र
सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्य्यवसानेऽन्यसाधर्म्येण सत्प्रति
पक्षसम्भवात् अप्रयोजकत्वाच्च विपरीतसाधनमिति तुल्यं नियमग्राह
कस्याप्रयोजकत्वात् जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिः-
शास्त्राद्ययथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति तस्मात् सामान्य
मुखप्रवृत्तस्य सहकारिविशेषाद्विशेषपरस्यानुमानस्य तद्विशेषविप-
क्षग्राहकप्रमाणेन सत्प्रतिपक्षत्वम् । न च प्रमाणविरोधेनास्य तर्को
न सहकारीति वाच्यं तर्कावतारे विशेषपरत्वाभावेनाविरोधात्
तदवतारे तदधिकरणत्वादेव अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तद-
वतारेऽपि तत्त्वं न निवर्त्तते किञ्चैवमर्थापत्तावपि तद्विरोधेन न सह-
कारी स्यात् । यदुक्तं मरणाभावे शतवर्षावच्छिन्नजीवी गृह एवेत्य-
स्यापि बाध इति तन्न विशिष्टबाधो न विशेष्यबाधात् मरणेऽपि जीवी
गृह एवेत्यस्य विशेष्यस्याबाधात् किन्तु विशेषणबाधात् स च शतवर्ष

जीवित्वसाधक एव विशेषणाभावाद्यतो विशिष्टाभावेऽप्यस्तीति चेन्न विशेष्यवति विशिष्टाभावस्य केवलविशेषणाभावात्मकत्वात् विशिष्टस्यातिरिक्तस्यानभ्युपगमात्। अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव नास्तीति प्रमाणेषु द्वयोरविरोधेपि तृतीयमादाय विरोधज्ञानमस्ति तत्र जीवी गृह एवेत्यत्र प्रमाणघटितप्रमाणद्वयविरोधज्ञानजनिताप्रामाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधापादकमप्रमाणविरोधि बहिःसत्त्वं कल्प्यते यथोक्तसंशयस्यायमेव स्वभावो यद्वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति तन्तुच्छम् अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात् तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानसिद्धत्वान्न फलबलेन तथार्थापत्तिकल्पनं। किञ्च कृते गृहस्थिते बहिःस्थितत्वसंशयादेव बहिःसत्त्वं गृहासत्त्वं मरणञ्च कल्प्येत कस्यचित् क्वचिद्वस्तुगत्या अप्रमाणत्वात् अर्थापत्त्याभासस्यैवं न स्यात्। स्यादेतत् माभूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात् तथाहि जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति बहिःसत्त्वं विना जीवितो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति धीरस्ति तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम्। नच देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् घटवदित्यनुमानाद्विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीति व्याप्तिग्रहवानुमानाद्वा बहिःसत्त्वसिद्धेः किमर्थापत्त्येति वाच्यं हेतुसाध्ययोः सहचाराज्ञानदशायामनुपपत्तिज्ञानेपि बहिःसत्त्वज्ञानात् सामान्यतो व्याप्तिग्रहानुमाने उपसंहर्तुमशक्येति तदन्यदेशसिद्धिरर्थापत्त्यैव। ननु जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्तबहिःसत्त्वं विना उत बहिःसत्त्वमात्रं विना नाद्यः प्रथमं देवदत्तबहिःसत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात् प्रतीतौ वा किमर्थापत्त्या अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रयः तदुक्तं

तत्सत्त्वं तत्सिद्धेरन्यथा तदसिद्धेरिति । नान्यः त्वदीयबहिःसत्त्वज्ञानं विनानुपपत्त्यभावात् बहिःसत्त्वमात्रसिद्धावपि देवदत्तबहिःसत्त्वासिद्धेरिति चेन्न सामान्येन हि विनानुपपत्तिज्ञानं कारणं सामान्याकारेण शेषज्ञानं फलं तथाहि जीवतो बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र बहिःसत्त्वं कल्पयति नान्यत्र देवदत्तस्य तथेति सिद्धे देवदत्ते बहिःसत्त्वं कल्पयतीति देवदत्तबहिःसत्त्व पर्य्यवस्यति ननु तेन रूपेण कल्पना नवा तेन विनानुपपत्तिज्ञानं कारणं यथा वह्निमात्रव्याप्याद्धूमात् पर्व्वते वह्निसिद्धिरेव पर्व्वतीयवह्निसिद्धि नतु पर्व्वतीयत्वेनैव धूमात्तत्सिद्धिः तेन रूपेण व्यापकत्वाग्रहात् । अथोपपादकाभाववत्युपपाद्याभावनियमोऽनुपपत्ति र्नत्वभावमात्रमतिप्रसङ्गात् एवञ्च व्यतिरेकव्याप्तिमत उपपाद्यव्यतिरेकानुमानमनुमानेनैव साध्यसिद्धेः किमर्थापत्त्या तथाहि देवदत्तो बहिः सन् जीवित्वे सति गृहासत्त्वात् यन्नैवं तन्नैवं यथा मृतो गृहस्थितो वा न चान्यथानुपपन्नस्य गमकत्वेऽति प्रसङ्गः साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात् नचार्थापत्तौ स्वरूपसती व्याप्तिर्लिङ्गं नानुमानमिति वाच्यम् अनुपपत्तेर्ज्ञानं विना कल्पनानुदयात् अर्थापत्त्यभावप्रसङ्गाच्च । मैवम् अत्र हि व्यतिरेकव्याप्तिमन्वयस्य पक्षधर्म्मत्वमिति व्याप्तिधीजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः तस्या व्याप्यपक्षधर्म्मताज्ञानजन्यत्वनियमात् । नच साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्म्मस्य ज्ञानमनुमितिप्रयोजकमिहाप्यस्तीति वाच्यं केवलान्वयिनि तदसम्भवात् तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च । अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिर्ग्रहे तत्रान्वयस्य व्यतिरेकस्य उभयस्य वा सहचाराद्व्याप्तिग्रहवैविध्येऽनुमानत्रैविध्यम् अत एव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति अस्तु तावदेवं तथापि जीवद्देवदत्ताभावो गृहे वर्त्तमानो न बहिःसत्त्वे लिङ्गं देवदत्तावृत्तित्वात् बहिःसत्त्वगृहनिष्ठाभावयोर्व्यधिकरणत्वेन

नियतसत्ताभावाधिकरणत्वग्रहस्यव्याप्त्यभावाच्च । उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरि सन्निहितसवितृकत्वेनानुमानात् नापि गृहनिष्ठाभावप्रतियोगित्वं तत्प्रतियोगित्वस्य देवदत्तधर्म्मतया तदसन्निकर्षे प्रत्यक्षेण ग्रहीतुमशक्यत्वात् अतएव विशेष्यासन्निकर्षात्तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षः । न च व्यतिरेकव्याप्तिग्रहगृहनिष्ठाभावयोर्ज्ञानं सहकार्य्यात्मनसैव तज्जन्यत इति वाच्यं सहकारिण एव मानान्तरत्वप्रसङ्गात् । अथ व्याप्तिज्ञानानन्तरं पर्व्वतो धूमात् कथमनुमितिः उक्तन्यायेन तथापि लिङ्गपरामर्शाभावादिति चेन्न कथञ्चित् यथा तर्हि वह्निज्ञानं पक्षधर्म्मधूमस्य सिद्धत्वात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण अतएव दृश्यमानो धूमो वह्निं विनानुपपन्न इति यदा ज्ञायते तदार्थापत्तिरेव यदा त्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानं त्वयापि त्रिविधानुमानस्वीकारात् तस्माद्व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्तगृहाभावो बहिःसत्त्वं कल्पयति । उच्यते । देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभाव प्रतियोगित्वं प्रत्यक्षेण गृह्यते तथाहि गृहे देवदत्तस्याभाव इति प्रत्ययो देवदत्तं षष्ठ्यर्थस्याभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति सम्बन्धज्ञानस्य सम्बन्धिद्वयविषयत्वात् प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते कृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम् । न च देवदत्तविशेष्यकं बहिःसत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यं पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात् । अथवा अनतिप्रसक्तसहकारिवशान्मनसैव कृतदेवदत्तविशेष्यकतृतीयलिङ्गपरामर्शः यथा च न सहकारि मानान्तरं तथोपपादितमधस्तात् । ननु मयूरः पर्व्वतेतरे न नृत्यति नृत्यति चेति ज्ञानानन्तरं पर्व्वते नृत्यतीति ज्ञानमस्ति न च व्यतिरेकिणा तत्सम्भवति पर्व्वतनृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्त्यनिरूपणात् नच पर्व्वतनृत्यस्याप्रसिद्धौ